# प्रतापविजयम् ।

## अङ्कानुक्रमः


| अङ्काः | नामानि | पृष्ठाङ्काः |
|---|---|---|
| १. | मानसिंहापमानः | १९३ |
| २. | हल्दीघाटसंग्रामः | २०६ |
| ३. | मेवाडाक्रमणम् | २१६ |
| ४. | शैलदुर्गाश्रयः | २२४ |
| ५. | शैलविहारः | २३५ |
| ६. | सार्वभौममानावखण्डनम् | २४२ |
| ७. | भृषावादपरिहारः | २५० |
| ८. | विजयप्रयाणाम् | २५९ |
| ९. | विजयमहोत्सवः | २६६ |
| | पद्यसूची | २७२ |
| | पद्यानां छन्दःसूची | २७४ |
| | गीतानां तालिका | २७५ |
| | गीतानां स्वरसंयोगाः | २७६ |


# अथ
# प्रतापविजयम् ।

## प्रथमोऽङ्कः ।

उत्साहाश्रितबालकेलिसदने वृन्दावने नन्दनो
 योऽत्यर्थं कुटिलश्च कालयवनावस्कन्दजे संभ्रमे ।
मोहाक्रान्तजयस्य यो विनयने ज्ञानप्रभाभास्वरः
 पायाद्वः स महाद्भुतो यदुपतेर्नानाप्रचारो नयः ।।१।।

### नान्द्यन्ते

**सूत्रधारः-**(नेपथ्याभिमुखमवलोक्य) आर्ये अलमतिपरिश्रमेण । इतस्तावदागम्पताम् ।

---

ईशानापकृतेरनङ्ग इति यः ख्यातस्त्रिलोक्यां पुन-
 र्जातो यस्य सुतत्वमेत्य स नवः सर्वाङ्गसौन्दर्यभाक् ।
श्रीशं विश्वजितं तमिष्टवरदं नत्वा पदे श्रीधरो
 व्याख्यां वाक्यविशारदो वितनुते सर्वाङ्गविद्योतनीम् ।

अथ नाटकादौ विघ्नोपशान्तयेऽवश्यकर्तव्यतयोपदिष्टां 'आशीर्नमस्क्रियारूपः श्लोकः काव्यार्थसूचकः। नान्दीति कथ्यते' इत्यादिलक्षणलक्षितामाशीरूपां 'सूत्रधारः पठेन्नान्दीं मध्यमस्वरमाश्रितः । नान्दीपदैर्द्वादशभिरष्टाभिर्वाप्यलङ्कृताम् ।।' इति श्रीमदभिनवगुप्तपादाचार्यमतानुसारेण चतुरस्रतालानुगतां चतुष्पदां नान्दीं सूत्रधारः पठति-**उत्साहाश्रितेति** । ***

अथ 'श्लोकः काव्यार्थसूचकः' इत्युक्तत्वादस्य तत्सूचकत्वं निरूप्यते । अत्र यदुपतिपदेन विष्णोरंशेनावतीर्णः प्रतापसिंहः वृन्दावनपदेन शैलवनविहारः बालयवनावस्कन्दजे संभ्रमे इत्यनेन प्रजाभिः सह शैलदुर्गाश्रयः यवनैः शैलावरोधश्च विनयनपदेन युवराजानुशासनं मोहाक्रान्तजयस्य इत्यनेन युवराजस्य प्रणयप्रबन्धः नानाप्रचारो नयः इत्यनेन च कुटिलनयालम्बनं सूच्यते । उत्साहपदेन उत्साहस्थायिनो वीरसस्याङ्गित्वं बालकेलिसदनं इत्यनेन शृङ्गारस्य संभ्रमपदेन रौद्रस्य अद्भुतपदेन च अद्भुतादीनां रसानां अङ्गत्वं सूच्यते । अत्र शार्दूलविक्रीडितं वृत्तम् ।

**नान्द्यन्त इति-**अत्र पत्रावलीसंज्ञा नान्दी-'यस्यां बीजस्य विन्यासो ह्यभिधेयस्य वस्तुनः । श्लेषेण वा समासोक्त्या नान्दी पत्रावलीति सा ।।'

**सूत्रधार इति-**सूत्रं प्रयोगानुष्ठानं धारयतीति सूत्रधारः स्थापकनामा नटः ।

(प्रविश्य)

**नटी**–इयमस्मि । आज्ञापयत्वार्यपुत्रः ।

**सूत्रधारः**–अद्य खलु नटपुरवास्तव्यमूलशङ्करविरचितेन प्रतापविजयाख्येनाभिनवेन नाटकेन सभाजनीयैषा विद्वत्परिषत् । तत्प्रस्तूयतां तावन्मधुरस्वरतालबद्धा काऽपि रमणीया गीतिरस्याश्चेतःप्रसादनाय । संप्रति खलु

चण्डातपपरितप्तो
निजपदमपहाय सेवते लोकः ।
नवमल्लिकाकमलिनी
सरःस्रवामण्डितान्युपवनानि ।।२।।

**नटी**–यदाज्ञापयत्यार्यपुत्रः ।

(इति गायति)

**(भीमपलासरागेण त्रितालेन गीयते ।)**

सुखयति मधुररसा सरसी ।।
सारसहंसविहंगममिथुनं ।
विहरति मृदु रहसि ।। सुख०।।१।।
क्रीडति युवतिजनस्तनुवसनः ।
विमलशिशिरपयसि ।। सुख०।।२।।
उपवनकुसुममनोहरसौरभ– ।
मदमुदितो मनसि ।। सुख० ।।३।।

**प्रतापविजयेति**–प्रतापस्य मेवाडाधीश्वरप्रतापसिंहस्य विजयः यस्मिन् तत् प्रतापविजयं सा आख्या यस्य तेन नाटकेन ।

**नाटकेनेति**–तल्लक्षणमुक्तं दर्पणे 'नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम् । विलासर्ध्यादिगुणवद्युक्तं नानाविभूतिभिः । सुखदुःखसमुद्भूतनानारसनिरन्तरम् पञ्चाधिका दशपरास्तत्राङ्काः परिकीर्तिताः प्रख्यातवंशो राजर्षिधीरोदात्तः प्रतापवान् । दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः ।। एक एव भवेदङ्गी शृङ्गारो वीर एव वा । अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणेऽद्भुतः ।। चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपूरुषाः । गोपुच्छाग्रसमाग्रं तु बन्धनं तस्य कीर्तितम् ।।' इति ।

**सुखयतीति**–*** सायंतनोपवनविहारवर्णनम्।

[अस्मिन्नाटके टीकाकारैः रागलक्षणानि टीकायां यथास्थानं न दत्तानि, किन्तु ग्रन्थान्ते गेयपद्यानां रागस्वरसंयोगस्थाने दत्तानि । – सम्पादकः]



गायति रसिकजनो धृतवीणः
संमिलितः सदसि ।। सुख० ।।४।।

**सूत्रधारः**–आर्ये सुष्ठु गीतम् । संप्रत्यवसानाभिमुख एवायं ग्रीष्मसमयः । तदचिरेण प्रतापः परिपन्थिमण्डलानीव पाकशासनो मेघमण्डलानि निर्भिद्य नवरसैः प्रजा रञ्जयिष्यति ।

**नटी**–आर्यपुत्र कोऽयं प्रतापः ।

**सूत्रधारः**–किमपरिचितोऽस्ति तव सूर्यवंशमुक्तामणिः स्वातन्त्र्यैकरसो महाराजः प्रतापसिंहः । आर्ये पश्यैनं स्वमण्डलपरिवृतं राजकेसरिणम् ।

सहस्रकिरणद्युतिर्ज्वलनचण्डदृष्टिः स्वयं
गिरीन्द्रसदृशच्छवी रिपुदलाभ्रमालाशनिः ।
धरापतिरयं निजैः सचिवमन्त्रिभिः सेवितः
स्थितोऽप्रतिमविक्रमः विजयमन्त्रयोगोन्मुखः ।।३।।

## प्रस्तावना

(ततः प्रविशति यथानिर्दिष्टो महाराजः प्रतापसिंहः)

**मन्त्री**–मायाविनो मोगलेशस्य सेनापतिर्मानसिंहः क्षत्रेश्वराणां राष्ट्राण्यवमृद्य नयप्रयोगैरस्मान्वशीकर्तुमत्र संप्राप्तः । तत्क्षिप्रमेवोपकल्पनीयमुपपन्नं प्रतिविधानम् ।

**प्रतापसिंहः**–(सावेगम्) यत्सत्यमेतेषां क्षत्रापसदानां दुर्वृत्तैरेवानुभवन्तीमां दुरवस्थामस्मद्भारतभूमयः ।

निष्कारणं हतधियः स्वजनैर्विरोधं
कृत्वाऽधमानपि परान् समुपासते ये ।
कल्पद्रुमं सकलकामदुघं विमोहा–
दुन्मूल्य ते विषतरुं स्वकुले वपन्ति ।।४।।

एवं स्वजनद्रोहकलुषितैः सर्वैरपि भारतनृपालैः प्रमाणीकृत्य तुरुष्क–शासनमुप्तमेव क्षत्रकुलविध्वंसबीजम् । तथाऽपि

**सहस्रकिरणेति**–*** अत्र पृथ्वीवृत्तम् ।

**निष्कारणमिति**–*** परान् रिपून् यवनानित्यर्थः । *** अत्र वसन्ततिलकावृत्तम् ।

**तुरुष्केति**–तुरुष्कस्य तुरुष्कजातीयस्य सार्वभौमस्य अकबरस्य शासनं आधिपत्यम् ।

त्रिभुवनविततोज्ज्वलप्रतापे
दशवदनारियशःप्रभाप्रदीप्ते ।
विमलदिनकरान्वये प्रसूतो
न हि सहते परशासनं प्रतापः ।।५।।

तदस्माभिः कथमपि रक्षणीयं परंपरागतं मेवाडस्वातन्त्र्यम् ।

**अमात्यः–**अथ किम् । अपि चामितकोशबलसमृद्धोऽयं नयमार्गविचक्षणः पूर्वं क्षत्राधिपैः सह मैत्रीं विधायानन्तरं तान् दासनिर्विशेषतामापादयति । तदनेन सख्यमपि संशयावहम् । यतः

साम्ना विधाय नृपतीन् स्वनयानुकूलान्
योऽयं क्रमेण कुरुतेऽपहतप्रभावान् ।
स्वच्छन्दचारिमदमत्तमतङ्गजानां
यूथानि दाम्यति गजग्रहलीलया सः ।।६।।

**मन्त्री–**एवमेत् । तथापि सांप्रतं त्वस्माभिः सभाजनीयोऽयमतिथिविशेषः । यतः सचिवायत्ता हि सर्वे विदेशीयनृपालानामुपक्रमाः । एवं

प्रत्युद्गतैः स्वैः कुशलानुयोगै–
र्दानैश्च मानैर्मधुरैर्वचोभिः ।
ऐश्वर्यमत्तो रिपुरप्यमर्षणः
सभाजितः सद्य उपैति मित्रताम् ।।७।।

**अमात्यः–**उपपन्नमेवाभिहितं मन्त्रिवर्येण । यतः

निमित्तमुद्भाव्य किमप्यनर्थकं
नृपाधमा राष्ट्रजयार्थलोलुपाः ।
व्यापादयन्त्यल्पबलान् नृपाला–
ननागसो जानपदांश्च निर्घृणम् ।।८।।

---

**त्रिभुवनेति–*** पुष्पिताग्रावृत्तम् ।
**साम्नेति–*** अत्र निदर्शनाऽलंकारः ।
**प्रत्युद्गतेति–*** उपजातिवृत्तम् ।



तद्बहुमानपूर्वयातिथ्यक्रियया प्रसादनीयोऽयं मोगलसेनापतिः । तस्मिंश्चानुकूले संवृत्ते निरुपद्रवा भविष्यत्यस्मन्मेवाडभूः ।

**प्रतापसिंहः–**सुव्यवस्थितोऽयं मन्त्रनिर्णयः । कः कोऽत्र भोः ।

(प्रविश्य)

**द्वारपालः–**आज्ञापयतु देवः ।

**प्रतापसिंहः–**सभागृहमार्गमादेशय ।

**द्वारपालः–**इत इतो देवः । (सर्वे परिक्रामन्ति) एतत्सभागृहद्वारं प्रविशतु देवः सानुगः ।

(इति निष्क्रान्तः)

(ततः प्रविशन्ति स्वासनेषूपविष्टाः सभ्याः)

**सभ्याः–**(उत्थाय) विजयतां महाराजः ।

**प्रतापसिंहः–**(रत्नसिंहासनमारुह्य) स्वागतं सभ्यवर्याणाम् । अद्य खल्वातिथ्यक्रियया सभाजनीयोऽतिथिविशेषः कुमारो मानसिंहः । (द्वारदेशं विलोक्य) उपस्थित एव यथासमयमेष सपरिवारः ।

(ततः प्रविशति मन्त्रिपुरःसरः सपरिवारो मानसिंहः)

**प्रतापसिंहः–**स्वागतं कुमारस्य । (स्वपार्श्वे उपवेशयति)

**मानसिंहः–**अप्यनामयं क्षत्रकुलनायकस्य ।

**प्रतापसिंहः–**अथ किम् । अद्य खलु सर्वैः सानन्दमभिनन्द्यते कुमारस्य मङ्गलागमनम् । (मन्त्रिणं प्रति) मन्त्रिन् संभावयैनं क्षत्रवीरं महार्होपचारैः ।

**मन्त्री–**यथाज्ञापयति देवः । (इतिमहार्हरत्नादीन्युपहरति)

**वीणिनौ–**(वीणावाद्येन गायतः)

**(भूपकल्याणरागेण मठतालेन गीयते ।)**

सुन्दरवनमाली मदयति हृदयमालि ।।
प्रमुदितनयनसारप्रणयिमनोविहार–
विलुलितकुसुमहारशाली वनमाली ।।मद० ।।१।।

ललितगमनविलासनवरसपरीहास
यौवनमदविकासशाली वनमाली ।।मद० ।।२।।
गोकुलकुललामपरमसुखैकधाम-
रसिकमनोविराम आलि हृदयमाली ।।मद० ।।३।।

**मानसिंहः**–महाराजस्याभिजनानुरूपसत्क्रियया परितुष्टस्यास्ति ममैतावदेवाभ्यर्थनीयं यन्महाराजेनालंकृत्य प्रधानसामन्तपदं संपादनीयः सार्वभौमस्यानुरागः । संप्रति

नियमितविपथानुवर्तिवर्गो
नयपरिपालितभारतैकचक्रः ।
नृपवरविबुधैरुपासितोऽयं
पृथुविभवेन विभाति भारतेन्द्रः ।।९।।

**प्रतापसिंहः**–कुमार अपि संभाव्यत एतत्तपनान्वयसंभवेषु नृपतिगणेषु । एते खलु

तेजस्विनः क्षत्रगुणे प्रतिष्ठिता
न चार्थकामापहतात्मविक्रमाः ।
प्राणान्तकष्टेऽप्यचला दृढव्रता
नैवाद्रियन्तेऽन्यनरेन्द्रशासनम् ।।१०।।

**मानसिंहः**–तथापि नावमन्यन्ते कालकृतं विपर्ययं विचक्षणाः । पुराऽपि नियतिनियोगपरवशेन त्रिदिवेशेनाङ्गीकृतं दशाननस्याधिपत्यम् । तत्स्वातन्त्र्य-निर्बन्धमपहाय निग्रहीतव्योऽयं यदृच्छोपगतोऽवसरः ।

**प्रतापसिंहः**–क्षत्रवीर, इक्ष्वाकुवंशस्य पुरतः का गणना त्रिदिवेशस्य वा दशाननस्य वा। पुरा महोक्षरूपधरस्य महेन्द्रस्य ककुदमारूढेन ककुत्स्थेन पराभूय दानवदलं समर्पितस्तस्मै त्रिविष्टपाधिकारः । तथैव स्वयंभुवरदर्पितो दशाननो रघुकुलतिलकेन रामचन्द्रेणैव समरमूर्ध्नि निहतः । तत्कुमारेण वृथात्मायासपदं न

**नियमितेति**–*** भारतेन्द्रः अकबरः । *** पुष्पिताग्रावृत्तम् ।

**अपि संभाव्यत इति**–अत्र मुखसन्ध्यारम्भः 'यत्र बीजसमुत्पत्तिर्नानार्थरससंभवा ।। प्रारम्भेण समायुक्ता तन्मुखं परिकीर्तिततम् ।।' इत्युक्तत्वात् ।



नेयः । यतः

उत्कृष्टे कुलदैवते रविकुले सामन्तचक्रे वरे
विश्रब्धः परिपन्थिदर्पशमनक्षीबे च बाह्वोर्बले ।
त्यक्त्वा क्षत्रकुलाभिमानमधमान् शुश्रूषुरुत्कन्धरः
स्वातन्त्र्यैकरसः परस्य वशतां यायात्प्रतापः कथम् ।।११।।

**मानसिंहः**–(स्वगतम्) अहो कथमेषोऽनुनेयः (प्रकाशम्) तावत्संभावयतु महाराजो मित्रभावेन मोगलसम्राजम् ।

**प्रतापसिंहः**–कुमार, एतदप्यनुपपन्नम् । यतः

लोकानुरञ्जनपरस्य जगत्प्रसूते-
स्तेजोमयस्य निजमण्डलमण्डनस्य ।
रात्रिंचरस्य च दृगावरणैकवृत्तेः
किं वा भवेद्दिनपतेस्तमसश्च सख्यम् ।।१२।।

**मानसिंहः**–(स्वगतम्) हा कष्टम् । सर्वथा दुराराध्योऽयमुत्कृष्ट-कुलाभिमानावलिप्तः प्राकृतो नृपालः । (प्रकाशम्) महाराज तव लोकोत्तर-स्वातन्त्र्यनिष्ठयाऽतीव संतुष्टोऽस्मि ।

**प्रतापसिंहः**–कुमार एतदेवास्ति तपनकुलसंभवानां नृपालानां परमं कुलव्रतम्।

**मानसिंहः**–महाराजस्य चिरप्रार्थितेन समागमेनाद्य मोदते मेऽन्तरात्मा। अथ स्वनिवेशं प्रति गमनायानुज्ञां दातुमर्हति महाराजः ।

**प्रतापसिंहः**–(युवराजं प्रति) वत्स, मन्त्रिद्वितीयस्त्वमुपत्तिष्ठ-स्वैनमतिथिविशेषम्।

**मानसिंहः**–(युवराजं निर्वर्ण्य स्वगतम्) अहो स्थान एव सूर्यवंशप्रभवाणां कुलाभिमानोद्रेकः । यतः कौमारकेऽपि

अङ्गप्रकर्षरुचिरायतलोहिताक्ष
आजानुलम्बिदृढबाहुविशालवक्षाः ।

**उत्कृष्ट इति**–उत्कृष्टे कुलदैवते एकलिङ्गेशे *** निजं स्वातन्त्र्यं परित्यज्य न कदापि पारतन्त्र्यमङ्गीकरिष्यतीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ।

**लोकेति**–*** अत्र वसन्ततिलकावृत्तम् ।

कंदर्पदर्पशमनोऽपि परंतपोऽयं

श्रृङ्गारवीरविभवं युगपद्विधत्ते ।।१३।।

**युवराजः**–तथा ।

**प्रतापसिंहः**–कः कोऽत्र भोः ।

(प्रविश्य)

**प्रतिहारः**–आज्ञापयतु देवः ।

**प्रतापसिंहः**–प्रापयैनं क्षत्रवीरं सरःप्रासादप्रदेशम् ।

**प्रतिहारः**–तथा ।

(इति सर्वैः सह परिक्रामति)

**मानसिंहः**–(परितो विलोक्य) युवराज नूनमनुपमां शोभामावहति समन्ततो नगराजिपरिवृतेयं राजधानी ।

**अमरसिंहः**–सन्त्येतेऽस्मत्स्वातन्त्र्यदेव्या विजयस्तम्भाः ।

नानामृगद्रुमविचित्रितगण्डवप्रा

आस्यन्दमानमदपूर्णजलप्रवाहाः ।

शैला इमे जनपदं परिवेष्टयन्तो

दिग्वारणा इव दिशः परिपालयन्ति ।।१४।।

**मन्त्री**–आर्य संप्राप्ता वयमुदयसागरपरिसरम् ।

**मानसिंहः**–अहो अतीव नयनसुभगोऽयं सलिलाशयः ।

प्रत्युप्तस्फटिकाच्छकान्तिविलसत्सोपानमालाकुलं

क्रीडत्सारसचक्रवाकमिथुनं फुल्लारविन्दालयम् ।

अन्तर्वारिणि बिम्बितानतवनश्रीलास्यलीलाङ्कितं

स्वच्छन्दं विधिना विनिर्मितमिदं मन्ये सरो मानसम् ।।१५।।

**प्रतिहारः**–एतत्सुवर्णध्वजमण्डितस्य सरःप्रासादस्य सभामण्डपद्वारम् ।

---

**नानामृगेति**–*** वसन्ततिलकावृत्तम् ।

**प्रत्युप्तेति**–*** हिमवति वर्तमानं मानसं सरः सृष्टिक्रमेण निर्मितं इदं तु स्वविलासार्थमित्यर्थः। शार्दूलविक्रीडितं वृत्तम् ।



तत्प्रविशन्तु मन्त्रियुवराजसहाया आर्यमिश्राः ।

(इति निष्क्रान्तः)

(प्रविश्य)

**मानसिंहः**–(सर्वैः सहोपविश्य) मन्त्रिवर्य प्रशंसनीयास्ति खलु महाराजस्यातिथ्यसत्क्रिया ।

**मन्त्रीः**–कुलधर्म एवैष तपनान्वयोद्भवानामीश्वराणाम् । एते खलु

जितेन्द्रिया लोकहितैकतत्पराः

स्वधर्मसंस्थापननिश्चितव्रताः ।

इक्ष्वाकुवंश्या अतिथीनुपागतान्

प्राणार्पणेनाऽप्यनुरञ्जयन्ति ।।१६।।

**मानसिंहः**–एवमेतद् । तथापि कोऽयं महाराजस्य नयोपचारातिक्रमे बलवदभिनिवेशो येन सार्वभौमस्य सख्यमपि स्वयं नाङ्गीकरोति ।

**मन्त्री**–सुविदितमेवैतदार्यस्य यत्स्वकुलप्रतिष्ठार्थे सहस्रशो वीरभटा-नप्याहुतीकृत्य परिपालयन्ति निजं परंपरागतं स्वातन्त्र्यव्रतमेते सूर्यवंश्याः ।

**मानसिंहः**–एवं स्वपक्षनिरसनेन साधनवैकल्यमापादयन्त एते परमार्थतो विपक्षमेवोपकुर्वन्ति ।

**मन्त्री**–तर्कानुगृहीतोऽप्ययं पक्षो न समाधत्ते तेजस्विनां मनांसि । तदेते तु

तृणाय मत्वा सुतबन्धुवर्गान्

राष्ट्रं समग्रं निजजीवितस्पृहाम् ।

प्रत्यर्थिविध्वंसविधौ विनिश्चिताः

स्वातन्त्र्यरक्षैकपराश्चरन्ति ।।१७।।

अपिच विनष्टायां स्वातन्त्र्यभावनायामसंभाव्यमेवास्याः पुनरुज्जीवनम् । यतः

मदमतङ्गजगण्डविदारण-

प्रथितविक्रम आशु मृगाधिपः ।

---

**मदमतङ्गजेति**–*** सिंहः अपि परवशः सन् मृगवत् दीनः भवति इत्यर्थः । द्रुतविलम्बितं वृत्तम्।

परवशः प्रकृतिं परिहाय किं
मृगदृशां क्रमशो न हि पद्यते ।।१८।।

**मानसिंहः**–नायं सार्वत्रिको नियमः । यतः

तपःप्रभावार्जितपुण्यसंचयै–
र्विद्रावितो मत्तसुरारिसंघैः ।
न किं गतश्रीर्विबुधेश्वरः पुनः
प्रपद्यते स्वं त्रिदिवाधिकारम् ।।१९।।

**मन्त्री**–परंतु दैवगत्या नष्टैश्वर्योऽपि त्रिदशेश्वरो न कदाप्यनुमोदते त्रिदश-परिपन्थिशासनम् ।

(प्रविश्य)

**प्रतिहारः**–जातः खलु भोजनसमयः । तदलंकुर्वन्त्वन्तर्गृहं मन्त्रियुवराजपुरस्कृताः सपरिवारा आर्यमिश्राः ।

**मानसिंहः**–कथमद्यापि नोपस्थितो महाराजः ।

**युवराजः**–बलवदुदरामयपीडितस्य महाराजस्य नास्ति संप्रति भोजनेऽभिरुचिः। परंत्वार्यं संभावयितुमचिरेणैवात्रोपैष्यति महाराजः ।

**मानसिंहः**–(विचिन्त्य) आं सम्यगाकलितं मयास्योदरामयस्य निदानम् । (सामर्षम्) युवराज सुष्टु जानाम्यहं तं चिकित्सितुम् ।

(ततः प्रविशति प्रतापसिंहः)

**मानसिंहः**–(उत्थाय) स्वागतं महाराजस्य ।

**प्रतापसिंहः**–अपि निर्वर्तितो भोजनसमारम्भः ।

**मानसिंहः**–महाराजस्योपस्थितिमन्तरेण कथमेतत्संभवति ।

**प्रतापसिंहः**–कोऽयं कुमारस्य मिथ्या निर्बन्धः ।

**मानसिंहः**–(साकूतम्) उदरामयमिषेण महाराजस्यापि केयमातिथ्यसत्क्रियायाः पराङ्मुखी प्रवृत्तिः ।

**प्रतापसिंहः**–(सोद्वेगम्) कुमार सर्वदा सन्ति सज्जातिथेया हि सूर्यवंशप्रभवाः। किन्तु समानान्वयाधिकारभाजामेव संभवति सहभोजनम् ।



**मानसिंहः**–(सरोषम्) तत्किं मां हीनकुलोद्भवमवधारयसि । यद्यावधि यवनसेनावमर्दात्तव राष्ट्रं कथमपि मया रक्षितं तस्येदं किं पारितोषिकम् । अरे वृथावलेप,

प्रथितकुलमहिम्ना गल्भसे किं मदान्ध
न खलु परिचितस्ते सार्वभौमप्रतापः ।
धवलगिरिसमुत्थः किं स्रवन्त्याः प्रवाहः
न विलयनमुपेयात्संगतः सागरेण ।।२०।।

तत्सावधानोऽवेक्षस्व भाविपरिणामफलम् ।

**प्रतापसिंहः**–(सरोषम्) अरे तुरुष्कपक्षपातिन्

प्राप्नोतु राष्ट्रं त्वचिराद्विनाशं
कुलं समग्रं लयमेतु सद्यः ।
सहस्रधाशु प्रविदीर्यतां वपुः
स्वातन्त्र्यमेकं शरणं परं मे ।।२१।।

अपिच

स्वातन्त्र्येऽपहृते त्रिविष्टपसुखं क्लेशाय मे केवलं
तस्मिन्नेव सुरक्षिते वनचरैर्वासोऽपि तोषावहः ।
यामासाद्य कृतार्थतामुपगता धर्मच्युतास्त्वादृशा
नैनां क्षत्रवरः श्ववृत्तिमधमां प्राणात्ययेऽप्याश्रयेत् ।।२२।।

**मानसिंहः**–(सरोषम्) अरे क्षुद्रनृपाल सार्वभौमस्य पुरतः का गणना त्वादृशस्य राजकल्पस्य ।

ऐश्वर्येणोल्लसन्तो गुणिगणविदुषामाश्रयाः कल्पवृक्षा
न्यायेनापालयन्तः कलहविघटितान् भारतीयान्नरेन्द्रान् ।
आत्मीये वा परे वा नियतमविकृता राजधर्मेऽप्रमत्ता
नैते कि माननीयाः प्रवरनृपतय सार्वभौमप्रतापाः ।।२३।।

तत्त्वमपि मिथ्यावलेपं परित्यज्य सार्वभौमस्य च शुश्रूषामुररीकृत्य संपादय

---

**प्रथितेति**–*** गल्भसे धाष्ट्र्यं प्रकटयसि । *** मालिनीवृत्तम् ।
**स्वातन्त्र्य इति**–*** शार्दूलविक्रीडितं वृत्तम् ।
**ऐश्वर्येणेति**–*** स्रग्धरावृत्तम् ।

तव जीवितसाफल्यम् ।

**प्रतापसिंहः–**(सरोषम्) हा क्षत्रकुलाभिशंसिन् तुरुष्कदास अलं तव प्रलापेन।

विक्रीय देशकुलधर्मयशोऽभिमानं
हा त्वं तुरुष्कपतये न विलज्जसे किम् ।
उद्दामशासनविशीर्णपरप्रतापः
सद्यः प्रचण्डकर एष विनेष्यति त्वाम् ।।२४।।

अरे क्षत्रापसद एष निष्कोशखड्गहस्तः प्रताप एव तव सकलयवनबलस्य पर्याप्तः । तदविलम्बेनैव तवाभिजनोचितमनुतिष्ठ ।

**मानसिंहः–**(साधिक्षेपम्) अरे असंबद्धप्रलापिन् शृणु सावधानः । यत्–

मिथ्याप्रलापपरुषाक्षरतर्जितोऽहं
सर्वत्र मानमहतामपि माननीयः ।
शस्त्रास्त्रनद्धचतुरङ्गबलैः समृद्धः
सद्यः समेत्य शमयामि तवावलेपम् ।।२५।।

(इति परिवारो निष्क्रान्तः)

**प्रधानमन्त्री–**प्रसीदतु महाराजः । तुरुष्कनयवशीकृतोऽसौ किमपि प्रलपतु नाम ।

आ बाल्याद्यावनेशप्रगतिपरिहतक्षात्रतेजःप्रभावो
नानाभोगाधिकारैरनुगुणकवलैः पुष्टदेहान्तरङ्गः ।
साशङ्कं तत्सपर्याऽवहितमतिरसौ मोदमानः श्ववृत्तौ
राजन् स्वातन्त्र्यभावं कलयति हि कथं यः पराधीनवृत्तिः ।।२६।।

**मन्त्री–**धिग्दौरात्म्यमस्य क्षत्रापसदस्य । अथवा प्रकृतिरेवेयं कितवस्य यदसौ

स्वल्पोपकारच्छलतो यथाक्षमं
धृत्वा स्वपाशेषु सतः शुचिव्रतान् ।

---

**विक्रीयेति–****** वसन्ततिलकावृत्तम् ।

**आबाल्यादिति–*** स्रग्धरावृत्तम् ।

**स्वल्पेति–*** कितवानां अल्पोऽप्युपकारः सतामनर्थाय भवति इति तात्पर्यम् । उपजातिवृत्तम्।



कृतघ्नतादोषबिभीषिकाकुलान्
न्याय्यात्पथश्चालयितुं समीहते ।।२७।।

**अमात्यः–**देव आत्मनस्तिरस्क्रियां पुरस्कृत्य क्षिप्रमेवासौ क्षत्राधमः प्रज्वलयिष्यति प्रशान्तं मोगलाधिपस्य वैरानलम् । तदविलम्बेनैव रणाभिमुखा भवन्त्वस्मत्सेनानिवहाः । यतः

अकारणद्वेषपरो नराधमः
परोदयाप्लुष्टनिजान्तरङ्गः ।
नीत्वा स्वपक्षे च्छलतो बलीयसः
पैशुन्यशस्त्रेण हिनस्ति सुव्रतान् ।।२८।।

**प्रतापसिंहः–**प्रसिद्धमेव निसर्गसिद्धं दौरात्म्यं साभ्यसूयानाम् । नूनं महता तुरुष्कबलेनास्मानभियोक्ष्यत एवासौ क्षत्रकुलविध्वंसकः । तथापि भविष्यति पर्याप्तं वीरभटप्रगल्भमल्पमप्यस्मद्बलमरातिदलविमर्दनाय ।

**मन्त्री–**देव सकृत्परास्तमपि रिपुसैन्यं पुनः पुनर्नवसैनिकैः समेधितमस्मान् परिबाधिष्यते । तत्तावदस्यापि प्रतिकारश्चिन्तनीयः ।

**प्रतापसिंहः–**नास्त्यत्रौत्सुक्यकारण् । सर्वदा विषमगतानामस्माकं भवत्येव परमशरण्यः शैलप्रदेशः । एतेनैवाद्यावधि परिपालितमस्मत्स्वातन्त्र्यम् । अतः परमपि तदाश्रया वयं प्रभविष्यामः प्रधर्षितुमपरिमितं तुरुष्कबलम् ।

तत्सुसंनद्धः सत्वरं प्रतिपद्यतां हल्दीघाटप्रस्थप्रदेशमस्मत्सेनापतिः । अवेक्ष्यन्तां च राजकार्याण्यमात्यप्रवरेण । यावद्वयमपि सज्जीभूय तत्रैव प्रतिष्ठामहे ।

**सेनापतिः–**यदाज्ञापयति देवः ।

**अमात्यः–**यद्देव आज्ञापयति ।

(इति निष्क्रान्ताःसर्वे)

।। समाप्तोऽयं **मानसिंहापमान**नामा प्रथमोऽङ्कः ।।

---

**अकारणेति–*** उपजातिवृत्तम् ।

**इति श्रीप्रतापविजयटीकायां सर्वाङ्गविद्योतन्यां**
**मानसिंहापमाननामा प्रथमोऽङ्क समाप्तः ।**

# द्वितीयोऽङ्कः ।

(ततः प्रविशति हल्दीघाटपरिसरे सेनानिवेशगतः
मन्त्रिसेनापतिसामन्तमण्डलपरिवृतः प्रतापसिंहः)

**प्रतापसिंहः**–दिष्ट्या संप्राप्तोऽयं चिरप्रार्थितो युद्धावसरः । तदद्य खलु

रिपुरुधिरपिपासाव्याकुलः खड्ग एष
प्रखरसमरकाङ्क्षी तृप्तिमेष्यत्यहो मे ।
न हि विपिनमदग्ध्वा वंशसंघर्षणोत्थ–
स्तनुरपि वनदावः शान्तिमाप्नोत्यपुष्टः ।।१।।

**मन्त्री**–अस्मत्सादिनिवहैः प्रसभमभियुक्ताः प्रतिभटाः क्षिप्रमेव स्वकर्मफलमास्वादयिष्यन्ति ।

(प्रविश्य)

**चरः**–विजयतां देवः । शैलाभोगपरिचयार्थमितो नातिदूरे मृगयापदेशेन पर्यटत्यल्पपरिवारो मानसिंहः । श्रुत्वा देवः प्रमाणम् ।

(इति निष्क्रान्तः)

**सेनापतिः**–तं तरसाक्रम्य निग्रहीतुमादिशतु मां देवः ।

**प्रतापसिंहः**–न ह्यकृतसंनाहमरातिमवस्कन्दितुमुद्युङ्क्ते क्षत्रवीरः।

**अमात्यः**–देव अनुपेक्षणीयोऽयं यदृच्छोपनतोऽवसरः । यतः

असत्यसन्धेषु जनेषु साधुता
हिंस्रेष्वहिंसा पिशुनेषु तथ्यम् ।
दया कृतघ्नेषु खलेषु चार्जवं
सद्यो विनाशाय भवन्ति भूभृताम् ।।२।।

---

प्रथमाङ्कान्ते–'सत्वरं प्रतिपद्यतां हल्दीघाटप्रस्थप्रदेशमस्मत्सेनापतिः'– इति प्रतापसिंहेन सूचितस्य द्वितीयाङ्कस्य पूर्वाङ्काविभागत इवावतीर्णत्वादङ्कावतारोऽत्रार्थोपक्षेपकः । तदुक्तं दर्पणे–'अङ्कान्ते सूचितः पात्रैस्तदङ्कस्याविभागतः । यत्राङ्कोऽवतरत्येषोऽङ्कावतार इति स्मृतः ।' इति ।

**रिपुरुधिरेति**–*** मालिनीवृत्तम् ।



**प्रतापसिंहः**–सर्वथाऽभिनन्दनीयं तव नयवचनम् । तथापि नायं पन्था अस्मत्पूर्वजैरभिप्रेतः । अतः रणमूर्ध्न्येवायं प्रत्यक्षीकरोत्वस्मद्बाहुवीर्यम् ।

(नेपथ्ये शृङ्गस्वनः)

**वैतालिकौ**–विजयताममोघप्रतापो महाराजाधिराजः ।

क्षणेनायं व्योम्नि ग्लपयदुडुताराग्रहगणान्
निराकुर्वन् ध्वान्तं भुवि परिसृतैरंशुनिवहैः ।
वितन्वन् विस्तीर्णान् नवविजयकेतून् प्रतिदिशं
स्वयंज्योतिः साक्षादुदयगिरिमारोहति रविः ।।३।।

**प्रतापसिंहः**–(ऊर्ध्वं विलोक्य) अहो प्रभाता रजनी । तत्प्रयाणप्रवणा भवन्त्वस्मद्वीरभटाः ।

स्मृत्वा पूर्वाननुपदकृतान् यावनेशापचारान्
जातामर्षः स्फुरदधरभुक् क्रोधसंरक्तनेत्रः ।
दर्पाध्मातप्रतिभटचमूघस्मरो बद्धकक्षः
बाह्वोर्वीर्ये प्रकटयतु मे वीरसामन्तसंघः ।।४।।

**झालामानसिंहः**–क्षत्रकुलाधीश्वर रविकुलपरिचर्ययैव परिणतिं गमिष्यती–दमकाण्डभङ्गुरमस्मत्क्षुद्रकलेवरम् । तद्

राष्ट्रप्रतिष्ठापरिपालनव्रताः
सज्जा वयं त्वद्वचनैकतत्पराः ।
निहत्य दृप्तान् परिपन्थिसैनिकान्
संतर्पयामोऽद्य रणाधिदेवताम् ।।५।।

**प्रतापसिंहः**–धन्यो वः सूर्यवंशानुरागः । तत्

स्वातन्त्र्यनिष्ठासुसमिद्धमन्यवः
संस्पर्धमानाः प्रबलैर्द्विषद्बलैः ।

---

**क्षणेनेति**–*** शिखरिणीवृत्तम् ।

**स्मृत्वेति**–*** मन्दाक्रान्तावृत्तम् ।

शस्त्रास्त्रनद्धाः प्रलयानिलोद्धता
वेगेन सद्योऽभिपतन्तु वीराः ।।६।।

यावदहं तुरुष्ककुलकिंकरं क्षत्रकुलाङ्गारं स्वयमेव निर्वापयामि ।

स्वरक्षणार्थं रचिताग्रमण्डलान्
तुरुष्कसेनानिवहान् विभिद्य ।
भल्लाग्रविद्धं स्वजनद्रुहं तं
हत्वा ज्वलन्तं शमयामि कोपम् ।।७।।

तत्सत्वरमभिषेणयतु तुरुष्कदलं सेनानायकः ।

**सेनापतिः**–तथा ।

(इति निष्क्रान्तः)

**प्रतापसिंहः**–(प्रशास्तारं प्रति) प्रच्छन्नाभियोगात्त्वं परिपालयास्मत्सेनानिवेशम्।

**प्रशास्ता**–यदाज्ञापयति देवः ।

(नेपथ्ये)

**सेनापतिः**–(तारस्वरेण) शीघ्रमभिसरत ।

**वैतालिकाः**–(पटहध्वनिनोद्गायन्ति)

**(भूपालीरागेण दादरातालेन गीयते ।)**

भट्टा नदताट्टमेव–
हर हर हर महादेव ।।
धावत रिपुकटकपारमधमकृतमहापचार–
रुष्टा नदता० ।।१।।
शरकृपाणरणत्कारचकितचपलतुरगसार–
कृष्टा नदता० ।।२।।
प्रहरणहततनुविदारविगलितरिपुरुधिरधार–
मृष्टा नदता० ।।३।।

---

**प्रशास्ता इति ।** पुरस्तादध्वनः सम्यक् प्रशास्ता रक्षणानि च ।
यायाद्वर्धकिविष्टिभ्यामुदकानि च कारयेत् ।।
(कौटलीयार्थशास्त्रम् अधि० १०, अ० १, १७, सं. आर.पी. कंगले, मुम्बई, १९६९)



अवसितरिपुरणविहारहृदयनिहितविजयहार–
तुष्टा नदता० ।।४।।

(नेपथ्ये महांश्चटचटाध्वनिः)

**प्रतापसिंहः**–(आकर्ण्य) अहो प्रयाता अस्मत्सेनानिवहाः ।

**मन्त्री**–(पुरतो विलोक्य) एष दत्तपर्याणस्तुरगराजो देवस्यारोहणं प्रतीक्षमाणो द्वारि तिष्ठति ।

**प्रतापसिंहः**–(उत्थाय) तावद्वयमप्यधिरुह्य तुरंगममभिपद्यामहे तुरुष्कदलम्।

(इति सर्वैः सह द्वारदेशमुपेत्याश्वमारुह्य सामन्तैः सह निष्क्रान्तः)

**प्रशास्ता**–(तारस्वरेण) सावधानास्तिष्ठन्तु सर्वे निवेशपालाः ।

**निवेशपालाः**–तथा ।

(इति नियोगं प्रतिपद्यन्ते)

**निवेशाध्यक्षः**–आर्य पश्यैष महाप्रतापो देवः,

प्रचण्डकोपानललोहिताक्षः
स्फुरद्भुजाग्रोद्धतभीमकुन्तः ।
तुरङ्गसारप्लुतकम्पिसंक्रमं
रणाङ्गणं धावति कूटकान्तकः ।।८।।

**प्रशास्ता**–(दूरं विलोक्य) अहो क्षणमात्रेण दृष्टिपथादतीतो देवः ।

**निवेशाध्यक्षः**–आर्य अल्पसंख्यानामप्यस्मत्सांयुगीनानां वीराणां निश्चित एव विजयः ।

**प्रशास्ता**–अथ किम् । अद्यावधि सूर्यवंशप्रभवैरेव रणप्रवीरैः परिपाल्यते क्षत्रकुलप्रतिष्ठा ।

**निवेशाध्यक्षः**–तथापि यत्पूर्वजैः स्वकुलप्रतिष्ठापरिपालनाय मेवाडेश्वराणां सामन्तपदमलङ्कृतं तेऽपि तुरुष्कमाश्रित्यास्मानुन्मूलयितुं प्रवर्तन्ते इति महत् शोकास्पदम्।

**प्रशास्ता**–भद्र प्रत्यासन्नविपत्तयः प्रायः विवेकात्परिच्युता इन्द्रियसुखमेव बहुमन्वाना परप्रसारितमायापाशनिगडितमानसा स्वजनेभ्यो द्रुह्यन्ति । किंतु सर्वत्र

---

**प्रचण्डेति**–*** उपजातिवृत्तम् ।

कर्तव्यनिष्ठानामेव विवेकिनां परिणामसुखोदयाः सन्ति सर्वेऽप्युपक्रमाः ।

**निवेशाध्यक्षः**–एवमेतत् । अन्यथा साहाय्यार्थमामन्त्रितानि सर्वाण्येव क्षत्रकुलानि परिहासपूर्वं देवस्यामन्त्रणमवज्ञाय मोगलेशविभवापहृतमानसानि कथं तमेव शरण्यं मन्वीरन् । तथापि पर्याप्त एकाक्यसहायोऽपि देवस्तेषां समस्तानां तेजःप्रशमनाय ।

(प्रविश्य)

**अश्ववारः**–(ससंभ्रमम्) दिष्ट्या हतो मानसिंहः ।

**प्रशास्ता**–भद्र विस्तरेण ज्ञातुमिच्छामि ।

**अश्ववारः**–शृणोत्वार्यः । प्रचण्डप्रतापैरस्मद्वीरभटैर्निर्भिन्नेऽरातिव्यूहे मातंगगण्डावलम्बाग्रचरणं चेतकमधिरूढेन देवेन निशितभल्लप्रहारेण हृदयमर्मणि विद्धो मानसिंहः ।

**प्रशास्ता**–अचिरेणास्वादितं स्वकृतघ्नताया दारुणं फलं क्षत्रापसदेन । भद्र पुनरपि शीघ्रमुपेहि समराङ्गणम् ।

**अश्ववारः**–तथा ।

(इति निष्क्रान्तः)

**प्रशास्ता**–व्रणविरोपणतैलपट्टिकाहस्ताः सज्जीभवन्तु सर्वे चिकित्सकाः ।

**निवेशाध्यक्षः**–(दूरं विलोक्य) सद्योव्रणातुरान् सैनिकान् प्रतीक्षमाणा एते चिकित्सालयमेवाधितिष्ठन्ति ।

(प्रविश्य)

**अश्ववारः**–(ससंभ्रमम्) आर्य महदत्याहितम् । देवस्य कुन्ताग्रेण विद्धं निजतीक्ष्णायसकञ्चुकं विलोक्य वरंडकपार्श्वमवष्टभ्यात्मरक्षां व्यदधादसौ पाटच्चरः । अत्रान्तरे मातङ्गशुण्डाग्रावधृतनिशितखड्गप्रहारेणानुविद्धश्चेतकस्य जघन्यश्चरणः । तेनाशु परावृत्य महता जवेन व्रणस्यन्दिरुधिरावसिक्ताङ्गं स्वामिनमत्रावहति तुरगराजः ।

(इति निष्क्रान्तः)

**प्रशास्ता**–अहं तावद्देवस्योपचारक्रियासंपादनार्थं शीघ्रं चिकित्सा-लयमुपसर्पामि।

(इति निष्क्रान्तः)



**निवेशाध्यक्षः**–अहमप्युपकार्यामुपेत्य देवस्य सुखासनं विरचयामि । (परिक्रम्य) एषा राजोपकार्या । (विलोक्य) अहो प्रागेवोपस्थापितं दृश्यते छत्रचामराद्यलंकृतं सुखासनं परिजनैः । यावदहमत्रैव स्थितः देवं प्रतिपालयामि ।

(प्रविश्य)

**संयुगप्रणिधिः**–भद्र देवं द्रष्टुमिच्छामि ।

(नेपथ्ये)

इत इतो देवः

**निवेशाध्यक्षः**–(आकर्ण्य) निर्वर्तितोपचारो देवः स्वयमेवात्रोपसर्पति ।

(ततः प्रविशति व्रणनिबद्धपट्टिकालंकृतकायः प्रशास्तृपुरःसरः प्रतापसिंहः)

**निवेशाध्यक्षः**–स्वागतं देवस्य ।

**प्रतापसिंहः**–(उपविश्य) युद्धप्रवृत्तिं ज्ञातुमिच्छामि ।

**निवेशाध्यक्षः**–श्रावयिष्यति स्वामिनं समरवृत्तमेष प्रागुपस्थितः संयुगप्रणिधिः।

**संयुगप्रणिधिः**–(प्रणम्य) विजयतां देवः । देवस्यालोकसाधारणविक्रमेण नष्टचेतनं मानसिंहं विलोक्य भयाकुलाः परितो प्राद्रवन् प्रसाधितश्मश्रवो यवनसैनिकाः। परंतु पुनः प्रत्यापन्नसंज्ञेन तेन प्रोत्साहिताः सर्वेऽप्येकभूय राजच्छत्रधरं झालासामन्तं सरभसमभ्यपतन् । तत्रैव सांप्रतं तुमुलं युद्धं प्रवर्तते ।

**प्रतापसिंहः**–शीघ्रमानीयतामत्र विरोपितव्रणो मे प्रियस्तुरगसारः । यावदहं सत्वरं समरभुवमुपेत्य संचूर्णयामि प्रत्यर्थ्यनीकम् ।

(प्रविश्य)

**द्वारपालः**–(ससंभ्रमम्) हा महत्कष्टम् । देवस्य सुखोपस्थितेरनन्तरमेव तीव्रवेदनोत्क्षिप्तांगः प्राणानजहात् तुरगराजः ।

**प्रतापसिंहः**–(दीर्घं निःश्वस्य) हा प्रिय चेतक । स्वाम्यर्थं स्वदेहमाहुतीकृत्य संपादितस्त्वया पशुनापि पुण्यलोकजयः । मम पुनर्

दुर्गाद्रितुङ्गसरिदुत्प्लवने प्रवीरो
व्यूहप्रभञ्जनपटुः समरे सहायः ।

मत्स्पर्शहर्षिततनुः समयेंगितज्ञो
हाऽच्छिन्न एष विधिनैकपदेऽश्वसारः ।।९।।

**प्रशास्ता**–समाश्वसितु समरप्रवीरो भारतैकवीरः । आरुह्यैनमपरं सिंधुवारं प्रतिष्ठतां देवो विजयाय ।

(प्रविश्य)

**संयुगप्रणिधिः**–(ससंभ्रमम्) हा महत्कष्टम् । हतो झालासामन्तः ।

**प्रतापसिंहः**–(सोद्वेगम्) हा केयमनर्थपरंपरा । नूनं महदत्याहितम् । स्थाने खलु छत्रचामराधिकार उपभुज्यते राष्ट्रभक्तै झालावंशप्रभवैः क्षत्रवीरैः । यतः

जाता न के नियतकर्मफलानि भुक्त्वा
काले विनाशमुदरंभरिणो व्रजन्ति ।
धन्यः स एव निजराष्ट्रसपर्यया यो
विस्तारयन् भुवि यशो निधनं प्रयाति ।।१०।।

**प्रशास्ता**–स्वाभिजनानुरूपमेवाचरितं झालावीरेण ।

**प्रतापसिंहः**–उपक्रान्तेऽपि दुर्दैवचेष्टिते तूर्णे समराङ्गणमुपेत्य स्वसंख्यातिरेकोत्सिक्तानरातीन् व्यापादयितुमुत्सुकायते मे हृदयम् ।

(नेपथ्ये)

प्रतिहतपरिपन्थिविक्रमो वर्द्धतां विजयश्रिया महाराजाधिराजः ।

(आकर्ण्य साश्चर्यम्) भद्र केयमस्मदीयानां विजयघोषणा ।

(ततः प्रविशति मन्त्रिसेनापतिप्रमुखः सामन्तगणः)

**सर्वे**–(शिरसाऽभिवन्द्य) वर्द्धतां विजयेन महाराजाधिराजः ।

**प्रतापसिंहः**–मम प्रिय प्रवीराः, अभिनन्दामि वः पराभिभवविक्रान्तम् । (मन्त्रिणं प्रति) सविस्तरं श्रोतुमिच्छामि युद्धव्यवसायम् ।

**मन्त्री**–शृणोतु देवः । सर्वतः समेतैर्यवनबलैः युगपदभियुक्तस्य झालावीरस्योपमर्देन जातामर्षाः सहसा प्रज्वलितान्तरङ्गा वयं तत्क्षणमेव प्रसभमवालुम्पाम परिपन्थिदलम् ।

---

**दुर्गेति**–*** समयं संकेतं च इङ्गितं गूढाभिप्रायं च जानाति इति समयेङ्गितज्ञः । एतादृशः एषः अश्वसारः चेतकः *** वसन्ततिलकावृत्तम् ।



तदानीं
महाप्रलयमारुतक्षुभितवारिधिव्याकुल–
मसृक्कणविलोहिताक्षमकरोद्रुषाऽस्मद्दलम् ।
प्रहारततिपाटितप्रतिभटाङ्गबन्धक्षत–
स्रवद्रुधिरकर्दमाप्लुतकबन्धमुग्रं रणम् ।।११।।

ततः स्वभटध्वंसस्खलितधैर्यावष्टम्भः समरभीरुर्मानसिंहः शृङ्गध्वानेन परावर्तयतावशिष्टान् सैनिकगणान् ।

**प्रतापसिंहः**–मम प्रिय प्रवीराः, तुष्टोऽस्मि भवतां साहसविक्रमोर्जितेन युद्धपाटवेन । परंचैवं विद्रावितोऽप्ययं दुरात्मा पुनरपि महता तुरुष्कबलेनास्मान् क्षिप्रमभियोक्ष्यते ।

(प्रविश्य)

**गूढप्रणिधिः**–विजयतां देवः । अचिरेणाजमेरनगरमुपेत्य ततः स्वयं मेवाडप्रदेशमाक्रमितुं मृगयाव्यपदेशेनात्रोपस्थास्यति सार्वभौमः । तावच्च मानसिंहाधिष्ठितस्य मोगलदलस्य गोगुन्दाग्राम एव निवेशस्थानं भविष्यतीति मन्त्रनिर्णयः सार्वभौमस्य ।

(इति निष्क्रान्तः)

**मन्त्री**–एवं परावृत्तोऽप्यल्पीयसा कालेन पुनरस्मान् परिबाधिष्यते–ऽयमसूयोपसृष्टः क्षत्राधमः । तच्छीघ्रं तावदुपकल्पनीयमत्र प्रतिविधानम्। यतः

न्यायानुवर्तिनमुदारगुणप्रतिष्ठं
स्वातन्त्र्यमात्रविभवं प्रकृतेः शरण्यम् ।
नेतुं निजाधमदशां प्रसभं प्रवृत्ताः
पापाः कदा नु विरमन्ति महोपमर्दात् ।।१२।।

---

**महाप्रलयेति**–*** पृथ्वीवृत्तम् ।
**न्यायेति**–*** वसन्ततिलकावृत्तम् ।

**प्रतापसिंहः–**प्रसन्नः खलु ते तर्कः । तत्संभृतबलैरस्माभिः प्रतिक्षण-मभियोगकाल प्रतीक्ष्यः ।

**प्रशास्ता–**पञ्चषैरहोभिः पुनरपि समरावतारक्षमा भविष्यन्ति सर्वेऽपि विभिन्नमर्माणोऽस्मद्वीरभटाः ।

**सामन्ताः–**देवस्यादेशमात्रेण समरोन्मुखा भविष्यन्ति सर्वेऽपि पौरजानपदाः।

**मन्त्री–**(विचिन्त्य) देव त्रिविधाः सन्त्यभियोक्तारः । धर्मलोभासुरविजयिन इति । तेषामुत्तिष्ठमानं सन्धिना मन्त्रयुद्धेन कूटयुद्धेन वा प्रतिव्यूहेतेति नयविधानम् । तद्धर्मविजयिनोऽपि मायाविनो मोगलेशस्य अतः परं कूटयुद्धेनैवोचितः प्रतियोगः ।

**प्रतापसिंहः–**कथमेतत्संभाव्यते रविकुलसंभवानां लोकेश्वराणाम् । एते खलु

स्ववीर्यविश्रम्भहतारिदुर्नया
धर्मार्थमात्मन्यपि निर्गतस्पृहाः ।
नैवोत्सहन्ते विषमं स्थिता अपि
कूटाभियोगानभिमन्तुमीश्वराः ।।१३।।

**मन्त्री–**उपपन्नमेवाभिहितं देवेन । परन्तु न कोऽपि पारयतेऽवधारयितुं नितरां निगूढं धर्मतत्त्वम् । अत एव प्रवर्तितं भुवि राज्ञामभ्युदयनिःश्रेयससाधनं नयतन्त्रं लोकसंग्रहचिकीर्षुभिर्महर्षिभिः । तद्विहितमेव कर्म सर्वदा लोकपालैरनुष्ठेयम् । अत्रापि समामनन्ति नयशास्त्रकोविदा यत्

लोकसंग्रहपरैर्जितात्मभिः
कर्मयोगनिरतैर्नृपोत्तमैः ।
पाप्मनां प्रमथने प्रकल्पितः
धर्मतन्त्रमपि बाधते नयः ।।१४।।

तत्कूटयुद्धेनैव प्रधर्षणीयोऽयं प्रबलारातिः ।

---

**अतः परं कूटयुद्धेनेति–**अत्र प्रतिमुखसन्ध्यारम्भः । तदुक्तं दर्पणे- 'फलप्रधानोपायस्य मुखसंधिनिवेशिनः । लक्ष्यालक्ष्य इवोद्भदा यत्र प्रतिमुखं च तत् ।।' इति ।

**स्ववीर्येति–******* उपजातिवृत्तम् ।

**लोकसंग्रहेति–******* रणोद्धतावृत्तम् । अत्रोपदिष्टाख्यं लक्षणम् ।



**प्रतापसिंहः–**प्रतिपद्येऽहं मन्त्रनिर्णयम् । यतो बलीयसा विगृह्यमाणानामस्माकं संशयित एव शाश्वतिको विजयः । तत्सर्वत्र समप्रदेशे स्थानिकाधिष्ठितान् सैनिकान् संस्थाप्य वयं तावत् कुंभलगडदुर्गमाश्रयामहे ।

**सर्वे–**यदाज्ञापयति देवः ।

(इति निष्क्रान्ताः सर्वे)

।। समाप्तोऽयं **हल्दीघाटसंग्राम**नामा द्वितीयोऽङ्कः ।।

---

**इति श्रीप्रतापपविजयटीकायां सर्वाङ्गविद्योतन्यां**
**हल्दीघाटसंग्रामनामा द्वितीयोऽङ्कः समाप्तः ।**

# तृतीयोऽङ्कः ।

(ततः प्रविशति मोगलसेनानिवेशोपवने परिक्रामन्तौ मानसिंहसेनानायकौ)

**सेनानायकः–**कुमार अविमृश्य रविकुलप्रतापं प्रतापेन सह विगृह्यमाणेन त्वया प्रज्वालितोऽयं वीरघस्मरो दावानलः प्रतिक्षणं भस्मसात्कुरुतेऽस्मदूर्जस्वलान् सेनानिवहान् ।

**मानसिंहः–**आर्य किमिति मां वृथाऽक्षिपसि । पूर्वमासीन्मे बलवान् प्रत्ययो यदल्पीयसा कालेनैव

कुटिलनयगुणप्रतारितोऽयं
सरभसमाहववागुरावरुद्धः ।
मगधपतिरिव प्रगल्भमानः
स्ववशमुपैष्यति राजधर्ममूढः ।।१।।

परंतु केनापि नयविचक्षणेनानुशिष्टोऽयं सर्वत्रास्मन्नयानुरूपं प्रतीकारमुपकल्पते। अन्यथा

यत्पूर्वजैराहवमूर्ध्नि संभ्रमात्
प्राणात्यये न क्रमितं पराक् पदम् ।
संभाव्यते तस्य कदापि निस्त्रपं
पराङ्मुखं संयुगतोऽपसर्पणम् ।।२।।

**सेनानायकः–**श्रुतं मया तु सैनिकमुखेन यद्रश्मिसंयमनादप्यनिरुद्धापसारेण तुरगसारेणासौ बलादपवाहितः समराङ्गणाग्रतः पश्यतः कुमारस्येति ।

द्वितीयाङ्कान्ते–'अचिरेणाजमेरनगरमुपेत्य ततः स्वयं मेवाडप्रदेशमाक्रमितुं मृगयाव्यपदेशेनात्रोपस्थास्यति सार्वभौमः ।' – इति गूढप्रणिधिना सूचितस्य तृतीयाङ्कस्यापि पूर्वाङ्काविभागत इवावतीर्णत्वादङ्कावतारोऽत्रार्थोपक्षेपकः।

**कुटिलेति–**कुटिलः यः नयः तस्य गुणैः 'संधिर्ना विग्रहो यानमासनं द्वैधमाश्रयः' इति षाड्गुण्यप्रयोगैः प्रतारितः वञ्चितः *** यथा वासुदेवार्जुनाभ्यां प्रतारितः जरासन्धः भीमेन द्वन्द्वयुद्धे निहतः तथेत्यनुसन्धेयम्। पुष्पिताग्रावृत्तम् ।

**यत्पूर्वजैरिति–**यस्य पूर्वजैः महाराणाश्रीसंग्रामसिंहादिभिः *** उपजातिवृत्तम् ।



**मानसिंहः–**आर्य साहसिकस्यैतस्य भल्लाघातेन क्षणं वीतसंज्ञस्य मम न नयनगोचरतामुपगतोऽयं प्रयाणप्रबन्धः । किंतु पुनः प्रकृतिमापन्नेन मयोपश्रुतमाधोरणमुखेनास्य क्षत्रबन्धोः ससंभ्रमं समरापक्रमणम् । तदनन्तरं प्रोत्साहितैरस्मद्वीरगणैराक्रमणमात्रेण परितो विद्रावितं सर्वं रिपुदलम् ।

**सेनापतिः–**तथापि कथमुपेक्षितं कुमारेणास्यान्वेषणम् । अपुनरावर्तिनः खल्वेतादृशा अनुगुणावसराः । यतः

मृगः पुरस्तात्प्रतिरुद्धसंचरः
यूथाद्वियुक्तः प्रमदो मतंगजः ।
मृगानुपाती च मृगाधिपः सुखं
निगृह्यतेऽद्धा विषमस्थितः परः ।।३।।

**मानसिंहः–**न मृगयाधर्मेणाभिसंपतन्त्यरातीन् क्षत्रप्रवीराः ।

**सेनापतिः–**अत एव तेषां सर्वत्र नियतः पराभवः । नयायत्तो हि राज्ञां प्रबलपरिपन्थिप्रमाथः धर्मायत्तश्च तेषां लोकानुरागः ।

(प्रविश्य)

**द्वारपालः–**विजयतामार्यः । कुमारद्वितीयमार्यं द्रष्टुमिच्छति सार्वभौमः ।

**सेनापतिः–**तदुपकार्यामार्गमादेशय ।

**द्वारपालः–**इत इतो देवौ ।

(सर्वे परिक्रामन्ति)

एतत्सार्वभौमोपकार्यायाः पुरोद्वारं प्रविशतां देवौ ।

(इति निष्क्रान्तः)

(ततः प्रविशति स्वमण्डलपरिवृतः सिंहासनाधिरूढः सार्वभौमः)

**उभौ–**(प्रविश्य) विजयतां सार्वभौमः (इति त्रिः प्रणम्योपविशतः)

**सार्वभौमः–**स्वागतं क्षत्रवीरयोः ।

**मृग इति–******* उपजातिवृत्तम् ।

**नर्तक्यौ–**(वीणावाद्येन गायतः)

**(जयवतीरागेण त्रितालेन गीयते।)**

इह सखि विहरति ललितविहारः ।
सुमनोमोहननन्दकुमारः ।। ध्रुवपदम् ।।
मुहुरनुपतति स विगलितलज्जः ।
तव मुखपङ्कजमलिरिव सज्जः । इह० ।।१।।
वादयते मधुरं मृदु वेणुम् ।
वसनगतमपि न धुवति स रेणुम् । इह० ।।२।।
जनमयि विध्यति नयनपथेतम् ।
अपसर दूरतरं स्वनिकेतम् ।। इह० ।।३।।

**पृथ्वीराजः–**(स्वगतम्) सुदूरमपसरणमेव मोगलसेनायाः श्रेयस्करम् ।

**सार्वभौमः–**(स्वगतं) रमणीयेनाप्यनेन गेयपदेन केवलं भाव्यमङ्गलमेवाक्षिप्यते। (प्रकाशं) सेनापते मयि संनिहितेऽपि कथं मन्दोत्साहा वर्तन्ते मम सेनानिवहाः ।

**सेनापतिः–**प्रसीदतु सार्वभौमः । नात्र दोषभाजोऽस्मत्सेनानायकाः । यत एते

आसाद्य गूढनिलयं समरप्रवीराः
यावद्रिपुं प्रसभमाक्रमितुं क्रमन्ते ।
तावत्प्लवङ्गम इवान्यशिलोच्चयाग्रं
संक्रामति द्रुतमसौ भयविप्लुतान्तः ।।४।।

**मानसिंहः–**सार्वभौमतेजसा प्लुष्टोऽयमात्मरक्षणार्थं संप्रति सेवते गिरिगह्वराणि।

**सार्वभौमः–**अत्र निवसतामस्माकमनर्थकायासेन व्यतीताःषण्मासाः । तथापि नोपलभ्यते भवादृशैः क्षत्रवीरैरस्योदन्तलेश इति महदाश्चर्यम् ।

**मानसिंहः–**प्रसीदतु सार्वभौमः । उग्रदण्डेऽप्यस्मिंस्तथाऽनुरक्ताः पौर-जानपदाटविका यथैते प्राणदण्डभयमप्यविगणय्य सर्वात्मना तद्धितैकतत्परा शैलोद्देशं पर्यटन्ति ।

**सार्वभौमः–**प्रकृत्यनुरागायत्ता हि राज्ञां त्रिसाधनाशक्तिसंपदः । तदुपजाप-



दानमानादिभिः कथमप्यनुकूलयितव्या अस्य प्रकृतयः ।

**सेनापतिः–**अभिनन्द्यते सार्वभौमस्याप्रतिमनयपाटवम् ।

**मानसिंहः–**अथ किम् । भेदनयमन्तरेण सर्वथा दुःसाध्योऽयं कान्दिशीकः प्राकृतः परिपन्थी ।

(प्रविश्य)

**चरः–**(ससंभ्रमम्) हा महदत्याहितम् । अकस्माच्छैलाभ्यन्तराद्विनिर्गतेन प्रतापेन व्यापादितं तदन्वेषणपरं पदातिदलम् ।

**सार्वभौमः–**(निःश्वस्य) हा कष्टम् । अथ कियत्परिमाणोऽस्य युद्धसंनाहः ।

**चरः–**तत्तु न शक्यते इयत्तया परिच्छेत्तुम् ।

**सार्वभौमः–**त्वं तावत्सत्वरं तमनुसृत्य मृगयस्व तस्य गूढनिकेतनम् ।

**चरः–**यदाज्ञापयति सार्वभौमः ।

(इति निष्क्रान्तः)

**सार्वभौमः–**(सनिर्वेदं) अहो बत महच्चित्रम् । संनिधौ संनिविशमानस्यापि मम प्रकटीकृतमनेन प्रागल्भ्यचेष्टितम् ।

**सेनापतिः–**स्वभाव एवैषोऽल्पकानाम् ।

महाजवैर्व्यधिगणैरनुद्रुतः
शैलावरुद्धः प्रतिषिद्धसंचरः ।
नैराश्यमास्थाय मृगोऽप्यहिंस्रकः
ससंभ्रमं साहसमेव पद्यते ।।५।।

**सार्वभौमः–**सेनापते न सम्यगाकलितं त्वया प्रत्यर्थिनः सामर्थ्यम् । अयं तु शैलदुर्गाश्रितश्चारचक्षुर्विज्ञायास्मत्सैनिकानां निगूढसंचारमकस्मादेव गिरिगह्वरान्निर्गत्य तेष्वभीक्ष्णं निपतति । क्षपयति चैवमपरिचितशैलसंक्रमानस्मत्सैनिकगणान् ।

**सेनापतिः–**परमार्थतो गृहीतः सार्वभौमेणास्य कुटिलनयप्रचारः ।

**सार्वभौमः–**तद्यावदस्मिन् प्रकृतयो न विरेज्यन्ते तावत्संशयित एवास्य विनिग्रहः।

**सेनापतिः–**प्रकृतिभेदमन्तरेणात्र न विद्यते किमपि प्रतिविधानम् ।

**मानसिंहः**–भेदोपायसाध्या हि भविष्यन्त्यस्योग्रदण्डस्य साम्राज्याधिकारपदलोलुपा मन्त्रिसामन्तगणाः । रत्नानामिव पुरुषाणामप्यस्ति मूल्यपरिमाणम् ।

संमानननानाविधदानयोगै-
मार्याप्रयोगैर्निकृतोपजापैः ।
प्रख्यापितैर्दोषगणैश्च भूभुजां
दृढानुरक्ता प्रकृतिर्विरज्यते ।।६।।

**सार्वभौमः**–(विचिन्त्य) कुमार दुष्करं ह्येतदप्यध्यवसितुम् । यतः प्रकृतिसमनुज्ञाभिषिक्तस्य साहसविक्रमोर्जितस्य नृपतेः प्रकृतय उपायशतेनापि ततो न विभिद्यन्ते ।

कृताभिषेकं गुणिनं महौजसं
न्यायप्रवृत्तं व्यसनेष्वसक्तम् ।
स्वयंवरेव प्रकृतिः प्रतारिता-
प्यर्थोपजापैर्न जहात्यधीश्वरम् ।।७।।

**मन्त्री**–दण्डमात्रेण वशीकर्तु शक्योऽयं क्षत्रवीरः । सुप्रयुक्ता अप्यत्र कुण्ठीभविष्यन्तीतरे नयोपचाराः ।

**सार्वभौमः**–अतः संनाह्य चतुरङ्गबलं स्वयमेव व्यं मेवाडविजयार्थ रणाङ्गणमवतीर्णाः । परं त्वेतावताकालेन न निग्रहीतुं शक्यतेऽयं राजानकोऽस्मद्वीराग्रसरैरित्युत्कण्ठतेऽस्मदन्तहहृदयम् ।

**मन्त्री**–प्रसीदतु सार्वभौमः । अल्पीयसा कालेनैव शैलावासक्लेशनिर्विण्णोऽयमन्विष्यति सार्वभौमस्य शरणम् ।

(प्रविश्य)

**द्वारपालः**–विजयतां सार्वभौमः । एष दिल्लीनगरत्संप्राप्तः संदेशहरो द्वारि तिष्ठति ।

**सार्वभौमः**–प्रवेशयैनम् ।

---

**संमानेति**– उपजातिवृत्तम् ।
**कृताभिषेकमिति**– कृतः अभिषेकः राज्याधिकारप्रतिष्ठापनं यस्य सः । *** उपजातिवृत्तम् ।



**द्वारपालः**–यदाज्ञापयति सार्वभौमः ।

(इति निष्क्रान्तः)

(प्रविश्य)

**संदेशहरः**–(त्रिः प्रणम्य) विजयतां सार्वभौमः । सार्वभौमचरण-सरोजरचिताञ्जलयः प्रणयपुरःसरमावेदयन्ति प्रधानमन्त्रिणः यत् प्रवर्तते संप्रति गान्धारेषु महान् विप्लवः । तत्र चापेक्षितं सार्वभौमस्य सान्निध्यमिति ।

**सार्वभौमः**–हा कष्टम् । कथं सर्वत्रापि मन्दोत्साहाः प्रतीयन्ते मम महामात्राः।

**पृथ्वीराजः**–प्रसीदतु सार्वभौमः । अविमृश्यकारिण एते ह्यविरतं लोकसंग्रहार्थं प्रयतमानस्य देवस्याभीष्टं संपादयितुं न क्षमन्ते । तदादिश्य युद्धविरामं गान्धारान् प्रतिपद्यतां सार्वभौमः ।

**सार्वभौमः**–अपि नाम ममाप्यधिकृतानामविमृश्यकारित्वम् ।

**पृथ्वीराजः**–यत्सत्यं न्यायप्रवृत्तेन तपनकुलाङ्कुरेण सह खल्वस्थान एवायं विग्रहोपक्रमः । यन्नायं व्यसनावलुप्तकुलाभिमान उदयसिंहः किंतु मूर्तः प्रतापः । अतः सकलकोशदण्डव्ययेनाप्यणुमात्रमेनं नमयितुं नैव प्रभविष्यति सार्वभौमः ।

हीनप्रभावोऽपि निगूढमन्त्रो
नृपो नयोत्साहगुणैः समृद्धः ।
दहत्यकस्माद्रिपुकाननं मह-
द्यथा स्फुलिङ्गोऽल्पतृणैः समेधितः ।।८।।

**सार्वभौमः**–(सस्मितम्) क्षत्रवीर विरलाः सन्ति त्वादृशा अप्रियस्यापि तथ्यस्य वक्तारः ।

**पृथ्वीराजः**–राजनीतिनिपुणाः श्रोतारश्च ।

**सार्वभौमः**–क्षत्रवीर नूनं नाद्यापि मम स्मृतिपथादपैति चितोडदुर्गावरोधप्रसङ्गः।

**पृथ्वीराजः**–सार्वभौम सर्वथाऽप्रतिहतप्रसरं हि क्षात्रं महः । प्रत्यक्षीकृतमेव सार्वभौमेण यच्छतशोऽस्मत्सैनिकान्निहत्य यदा सूर्यद्वारपालेन साहिदासेन समादृतः स्वर्लोकजयस्तत्कालमेव षोडशवर्षदेशीयं निजात्मजं पुरस्कृत्य तस्य जाया सपद्यवतीर्णा समराङ्गणाग्रम् ।

**सार्वभौमः–**नूनं लोकोत्तरविक्रमोर्जिता सा क्षत्राङ्गना ।

**पृथ्वीराजः–**अहो तदानीं

आकृष्टभीषणकृपाणकरालपाणि–
च्छिन्नोत्तमाङ्गरिपुसैन्यकबन्धकीर्णम् ।
तूर्णं विधाय समराङ्गणमेव चण्डी
चण्डप्रकोपहुतभुग्ज्वलिता विरेजे ॥९॥

**सार्वभौमः–**अत्यद्भुतम् ।

**पृथ्वीराजः–**तस्यामपि वीरगतिं प्रपन्नायां वीराग्रसरो जयमल्लः

संरम्भस्फुरितारुणाधररुचिः शौर्यातिरेकोत्कटो–
विद्युत्पात इवापतन् रिपुदले स्फूर्जत्कृपाणप्रभः ।
विच्छिन्नाङ्घ्रिभुजोत्तमाङ्गविकटां नृत्यत्कबन्धाकुलां
कृत्वासृक्स्रवणप्लुतां रणभुवं रेजे द्विषामन्तकः ॥१०॥

**सार्वभौमः–**धन्या खलु लोकोत्तरवीरप्रसूर्भारतभूः ।

**पृथ्वीराजः–**तद् विरोधं परित्यज्य मित्रपक्षमारोपयितव्योऽयं क्षत्रकुलनायकः सार्वभौमेण ।

**सार्वभौमः–**तथ्यमेवाभिहितं क्षत्रवीरेण । परंतु यशोमात्रविभवा हि लोकपालाः। नैते प्राणात्ययेऽपि परकृतमवहेलनमुपेक्षन्ते । तत्तेजस्विनमपि प्रतापमचिरेणैव स्वतेजसाऽभिभविष्यामः ।

**पृथ्वीराजः–**निसर्गसिद्धं हि निग्रहानुग्रहसामर्थ्यं सार्वभौमस्य ।

(प्रविश्य)

**द्वारपालः–**राजा भगवान्दासः द्वारि तिष्ठति ।

**सार्वभौमः–**तं शीघ्रं प्रवेशय ।

**द्वारपालः–**यदाज्ञापयति सार्वभौमः ।

(इति निष्क्रान्तः)

---

**आकृष्टेति–*****  वसन्ततिलकावृत्तम् ।

**संरम्भेति–*****  शार्दूलविक्रीडितं वृत्तम् ।



(प्रविश्य)

**राजा भगवान्दासः–**विजयतां सार्वभौमः ।

**सार्वभौमः–**(सरोषम्) अप्युपलब्धा काचित्प्रवृत्तिः प्रतापस्य ।

**राजा भगवान्दासः–**प्रसीदतु सार्वभौमः । शैलदुर्गमुपाश्रितोऽयं संप्रति विफलीकुरुते सर्वानस्मदुपक्रमान् । तदत्र कालः कश्चित् प्रतीक्ष्यः ।

**मानसिंहः–**प्रसीदतु सार्वभौमः । अचिरेणैव संपत्स्यते सार्वभौमस्याभीष्टम्।

**सार्वभौमः–**(सरोषम्) परं लज्जावहमेतत्क्षत्रवीरयोः । तदद्यप्रभृति प्रतिषिध्यते उभयोरपि राजकुलप्रवेशः ।

**उभौ–**(स्वगतम्) हा आस्वादितमस्माभिः स्वजनेष्वसहिष्णुतायाः दारुणं फलम्।

**भगवान्दासः–**(सप्रश्रयम्) मृष्यतु सार्वभौमः कार्यातिपातम् ।

**मानसिंहः–**(सप्रश्रयम्) कृपापारावारेण देवेन मर्षणीयोऽयं दासजनः ।

**सार्वभौमः–**क्षत्रवीरौ न सहते लेशमपि कार्यातिपातं सावभौम इति सम्यगवधार्यताम् । तदतःप्रभृति साम्राज्यकार्येष्वप्रमत्तैर्भवितव्यम् ।

**उभौ–**यदादिशति कृपावतारः सार्वभौमः ।

**सार्वभौमः–**तावदविलम्बेन निगृह्य मत्समीपमानीयतामस्मदरातिः । यावद्वयं राजधानीं प्रति प्रतिष्ठामहे ।

**उभौ–**तथा ।

(इति निष्क्रान्ताः सर्वे)

॥ समाप्तोऽयं **मेवाडाक्रमण**नामा तृतीयोऽङ्कः ॥

---

**इति श्रीप्रतापविजयटीकायां सर्वाङ्गविद्योतन्यां मेवाडाक्रमणनामा तृतीयोऽङ्कः समाप्तः ।**

# चतुर्थोऽङ्कः ।

(ततः प्रविशति कुम्भलगडदुर्गप्रासादावस्थितोऽमात्यः)

**अमात्यः**–(स्वागतम्) निजराजधानीं प्रतिनिवृत्ते मोगलेशे यवनमतङ्ग-गण्डविदारणपटुना क्षत्रकेसरिणा मेवाडेश्वरेण पुनरपि तरसाक्रम्य विजित एष दुर्गराजः। युवराजेनापि दिवेराक्रमणावसरे यवनसेनानायकमेकेनैव कुन्तप्रहारेणाविध्य प्रकटीकृतः स्वाभिजनानुरूपः पराक्रमः । एवं सर्वत्र विफलीकृतोऽपि मायावी मोगलेशो नाद्यापि मन्दोत्साहो लक्ष्यते । दिष्ट्या मेवाडसिंहासनमलङ्कुरुते संप्रति क्षात्रधर्मावतारः स्वातन्त्र्यैकरसो महाराजः प्रतापसिंहः । तथापि प्रचुरकोशबलसमृद्धस्य मायाविनो मोगलाधिपस्य प्रतिघाताय परिमितसाधनोऽयमेकाकी कथं प्रभविष्यती-त्यौत्सुक्येनाकुलीकृतोऽस्मि । कदाचिदयं

सामन्तमन्त्रिजनताप्रणयावदातः
शौर्यातिरेककुलगौरवगर्वितोऽपि ।
व्यूहोर्जितप्रतिभटोरुगणावरुद्धः
सौभद्रवत् परिभवास्पदतां प्रयायात् ।।१।।

तन्नयमार्गमेवावलम्ब्यावमर्दनीयोऽयं बलोत्कटः परिपन्थीति महाराजं विज्ञापयामि ।

(प्रविश्य)

**द्वारपालः** विजयताममात्यः । एष मोगलेशदूतो द्वारि तिष्ठति ।

**अमात्यः**–प्रवेशयैनम् ।

**द्वारपालः**–तथा ।

(इति निष्क्रान्तः)

(प्रविश्य)

**दूतः**–विजयतामार्यः ।

---

**सामन्तेति**–*** वसन्ततिलकावृत्तम् । उपमालंकारः ।



**अमात्यः**–स्वागतं विप्रवर्यस्य ।

**दूतः**–अमात्यस्य सौजन्यातिशयेन परितुष्टोऽस्मत्प्रधानमन्त्री विज्ञापयति– यदस्थान एव भवादृशा धीवैभवविश्रुता राजपुरुषाः केवलं दूरध्यवसायोपसृष्टेन राज्यश्रिया परिभ्रष्टेन साहसिकेन प्रतापेनैवं वैक्लव्यपदं नीयन्ते । तन्मिथो विद्वेषविलुप्यमानानां नृपाणां समायोगेन भारतीयप्रजासंग्रहार्थमुद्यतकृपाणः कृपावतारः सार्वभौमो भवादृशैः सत्वरं समाश्रयणीयः । सोऽयं प्रतिक्षणं प्रेम्णा प्रतीक्षते भवता साहाय्यालम्बनम् ।

न वै पुनर्गुर्वर्थसिषाधयिषया परिहीयमानोऽल्पोपक्रमो दोषाय कल्पते । तत्सर्वात्मनाऽभिनन्दनीयैषाऽभ्यर्थनाऽमात्यप्रवरेणेति ।

**अमात्यः**–विप्रवर्य, सर्वथा प्रशंसनीयोऽस्त्ययं भारतीयानां श्रेयःसंपादनाय सार्वभौमेणाङ्गीकृतो नयोपक्रमः । तथापि

प्रभञ्जनोत्पाटितवप्रपादपं
समुत्पतत्पन्नगराजिसंकुलम् ।
हित्वोद्धवं स्वं मलयं हिरण्मयं
मेरुं श्रयन्ते न हि चन्दनद्रुमाः ।।२।।

इति सप्रश्रयं निवेदय तव स्वामिने ।

**दूतः**–तथा ।

(इति निष्क्रान्तः)

**अमात्यः**–अहो प्रवर्तितोऽनेन भेदनयः । कदाचिदेतद्वागुरावनद्धाः केचनानभिजाता देवस्यानिष्टमप्यापादयेयुः । तच्छीघ्रं देवस्य पार्श्ववर्ती भवामि । कः कोऽत्र भोः ।

(प्रविश्य)

**द्वारपालः**–आज्ञापयत्वमात्यः ।

---

**न वै पुनरिति ।** – भारतीयनृपाणां संघटनरूपस्य गुर्वर्थस्य सिसाधयिषया साधयितुमिच्छया परिहीयमानः परित्यज्यमानः अल्पोपक्रमः मेवाडस्वातन्त्र्यरक्षणरूपः दोषाय न कल्पते न प्रभवति ।

**प्रभञ्जनेति**–प्रभञ्जनेन महावातेन *** । उपजातिवृत्तम् । अप्रस्तुतप्रशंसालंकारः ।

**अहो प्रवर्तितेति ।**– अत्र गर्भसन्ध्यारम्भः । तदुक्तं दर्पणे –'फलप्रधानोपायस्य प्रागुद्भिन्नस्य किंचन । गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान् मुहुः ।।' इति ।

**अमात्यः**–मन्त्रगृहमार्गमादेशय ।

**द्वारपालः**–इति इतोऽमात्यः । (उभौ परिक्रामतः) एतन्मन्त्रगृहद्वारं प्रविशत्वमात्यः ।

(इति निष्क्रान्तः)

(ततः प्रविशति मन्त्रगृहावस्थितो मन्त्रिद्वितीयः प्रतापसिंहः)

**अमात्यः**–(प्रविश्य प्रणम्य) वर्धतां देवो मालवजयेन । देवस्य प्रभावेण विजित्य मालवजनपदान् सर्वतः संगृहीतो मया राजांशः पञ्चविंशतिलक्षरूपकैः सहस्रस्वर्णमुद्राभिश्च परिमितः ।

**प्रतापसिंहः**–वीर अभिनन्दामि त्वत्कृतं यथासमयं रिपोराक्रमणम् । त्वं तावदेकतमे निगूढकोशागारे गोपायैनं महानिधिम् ।

**अमात्यः**–यदादिशति देवः ।

(प्रविश्य)

**युवराजचरः**–वर्धतां देवोऽभिनवविजयेन । महता शौर्येणाक्रम्य मोगलदलं कुमारेण निगृहीतो मोगलसेनापतेरवरोधः समीपतरवर्तिशृङ्गान्तरेऽवरुद्धः । श्रुत्वा देवः प्रमाणम् ।

**प्रतापसिंहः**–भद्र उच्यतां मद्वचनात्कुमारो यत्तवैतत्साहसेन परितुष्टः प्रतापस्त्वामभिनन्द्य तुरुष्कसेनापतेरवरोधं राजकुलोचितातिथ्यसत्क्रियापूर्वकं विसर्जयितुमादिशति । न कदाचित्परदारापहरणमनुमन्वते तपनकुलसंभवा इति ।

**युवराजानुचरः**–यदाज्ञापयति देवः ।

(इति निष्क्रान्तः)

(प्रविश्य)

**गूढचरः**–विजयतां देवः । महाराजमनिगृह्य परावृत्तस्य तव शिरश्छेदो भविष्यतीत्यादिश्य मोगलेशेन प्रेषितः सेनानायको महता कोशबलेन सह संप्राप्तोऽजमेरनगरम् ।

**प्रतापसिंहः**–भद्र पुनरपि ज्ञायतामस्य समरप्रवृत्तिः ।

**गूढचरः**–तथा ।

(इति निष्क्रान्तः)



**प्रतापसिंहः**–(सरोषम्) अविरतमस्मान् बाधितुं बद्धपरिकरोऽयमरातिः कथमपि शीघ्रं भग्नोद्यमः कर्तव्यः ।

**अमात्यः**–देव,

सामोपचारैर्नृपतिं समप्रभं
दानेन हीनं कुलधर्मनिष्ठम् ।
सत्त्वाधिकं भेदनयेन चोद्धतं
दण्डेन भिन्नप्रकृतिं वशं नयेत् ।।३।।

परंतु राजधर्मापेतस्य मायाविनो मोगलेशस्य मायाप्रयोगमन्तरेण न विद्यतेऽन्यः प्रतीकारः । तच्छैलदुर्गमाश्रित्य कूटाभियोगैर्वणिक्पथावरोधैश्चैतद्बलसंक्षयं विधायायं मन्दोत्साहः कर्तव्यः ।

**मन्त्री**–सर्वथाऽभिनन्दनीयोऽयं मन्त्रनिर्णयः । यतः

विगृह्य लोकाधिपतिर्बलीयसा
सुखं वसेन्नैव समानभूमौ ।
परं समेतं निचयापसारैः
समाश्रयेत्सत्वरमद्रिदुर्गम् ।।४।।

अपिच समामनन्त्यत्र नयमार्गविचक्षणा यत्–

पार्ष्णिग्राहप्रकोपं प्रकृतिविघटनं मित्रवर्गोपजापं
सेनायाः कूटयुद्धैः क्षयमनवरतं साधनानां व्ययं वा ।

---

**सामोपचारैरिति ।**– *** भिन्नाः प्रवृतयः राजस्य सप्त अङ्गानि 'स्वाम्यमात्यसुहृत्कोश-राष्ट्रदुर्गबलानि' *** । उपजातिवृत्तम् ।

**विगृह्येति ।** लोकाधिपतिः नृपः बलीयसा विगृह्य कलहं वृत्वा समानभूमौ जनपदे सुखं नैव वसेत्। परं परंतु निचयैः धान्यनिचयैः अपसारैः अपसरणमार्गैः च समेतं युक्तं अद्रिदुर्गं शैलदुर्गं सत्वरं समाश्रयेत् । उपजातिवृत्तम् । तदुक्तं कौटलीये–'दुर्बलो राजा बलवताऽभियुक्तस्तद्विशिष्टबलमाश्रयेत ।... सहायाभावे दुर्गमाश्रयेत । यत्रामित्रः प्रभूतसैन्योऽपि भक्तयवसेन्धनोदकोपरोधं न कुर्यात् । स्वयं च क्षयव्ययाभ्यां युज्येत । तुल्यदुर्गाणां निचयापसारतो विशेषः ।' इति । (अर्थशास्त्रम्–सं.कंगले, अधि० ७, अ० १५.१, ९–१०)

**पार्ष्णिग्राहेति**–अभियोक्तुः युध्यमानस्य रिपोः पार्ष्णिग्राहस्य पृष्ठप्रदेशाधिपस्य प्रकोपं प्रकृतीनां विघटनं भेदं मित्रवर्गस्य उपजापं कूटयुद्धैः सेनायाः क्षयं अनवरतं सततं साधनानां युद्धसामग्र्याः व्ययं दुर्भिक्षेण अनुपदं व्यसनं विपदं वा तस्य अभियोक्तुः उत्साहस्य भङ्गं यः निःशङ्कं असंशयं विधातुं प्रभवति सः एव सुखं दुर्गं संश्रयेत् न इतरः इत्यर्थः । स्रग्धरावृत्तम् । तदुक्तं कौटलीये– 'तद्दुर्गमेभिः कारणैराश्रयेत । पार्ष्णिग्राहमासारं

दुर्भिक्षेणाभियोक्तुर्व्यसनमनुपदं वा तदुत्साहभङ्गं
निःशङ्कं यो विधातुं प्रभवति स सुखं संश्रयेदेव दुर्गम् ।।५।।

तत्प्रबलपरिपन्थिपराभवायापर्याप्तनिचयमेतद्दुर्गं परित्यज्य नानाशस्यसंपन्नः सर्वतश्चापसारैरनुविद्धः शैलप्रदेश एवाशु समाश्रयणीयः । तत्र स्थिता वयं नानायोगैर्बलवतोऽप्यरातेः पराभवाय प्रभविष्यामः । यतः

गाढारक्तप्रकृतिरबलोऽनल्पवीर्यस्य शत्रोः
प्रत्याहन्तुं प्रभवति नृपो दुर्गसंस्थोऽभियोगान् ।
कालेनैवं विमृदितदलं हीनकोशं द्विषन्तं
नानायोगैरुपचितबलो लीलयैवोच्छिनत्ति ।।६।।

**प्रतापसिंहः**–सर्वथा प्रतिपद्येऽहममात्यानुगृहीतं मन्त्रिवचनम् । परं च कालकृतविपर्यासेन दूयते मेऽन्तरात्मा । यतः

रिपून्मथनजृम्भिताप्रतिमविक्रमैर्विश्रुता
ध्रुवं नृपतिपुंगवाश्चिरमितो विनाशं गताः ।
इमे विषयलोलुपा हतधियो नृपाः सांप्रतं
पराङ्घ्रियुगकिंकराः कलुषयन्ति गोत्रत्विषम् ।।७।।

**मन्त्री**–एवं नार्हति देवः क्षत्रकुलकलङ्कानां पापाचारैरात्मानमवसादयितुम् । यतः

जनैः ससत्त्वैः स्वकुलप्रतिष्ठा
संरक्ष्यते नैव निकृष्टसंघैः ।

---

मध्यममुदासीनं वा प्रतिपादयिष्यामि । ... वीवधासारप्रसारवधेन वास्य स्कन्धावारावग्रहं करिष्यामि; दण्डोपनयेन वाऽस्य रन्ध्रमुत्थाप्य सर्वसन्दोहेन प्रहरिष्यामि । प्रतिहतोत्साहेन वा यथेष्टं सन्धिमवाप्स्यामि । मयि प्रतिबद्धस्य वा सवंतः कोपाः समुत्थास्यन्ति । निरासारं वास्य मूलं मित्राटवीदण्डैरुद्घातयिष्यामि । ...निम्नखातरात्रियुद्धविशारदं वा मे सैन्यं पथ्याबाधमुक्तमासन्ने कर्मणि करिष्यति । विरुद्धदेशकालमिहागतो वा (स्वयमेव) क्षयव्ययाभ्यां न भविष्यति। महाक्षयव्ययाभिगम्योऽयं देशो दुर्गाटव्यपसारबाहुल्यात्, परेषां व्याधिप्रायः सैन्यव्यायामानामलब्धभौमश्च तमापद्गतः प्रवेक्ष्यति । प्रविष्टो वा न निर्गमिष्यतीति । कारणाभावे बलसमुच्छ्रये वा परस्य दुर्गमुन्मुच्यापगच्छेत्।' इति। (अर्थशास्त्र–अधि० ७, अ० १५. १२–१३)

**गाढारक्तेति ।** *** मन्दाक्रान्तावृत्तम् ।

**रिपून्मथनेति ।** *** पृथ्वीवृत्तम् ।

**जनैरिति ।** अर्थान्तरन्यासोऽत्रालंकारः ।



तिमिङ्गिलग्राहसमाकुलोऽम्बुधिः
रत्नैर्हि रत्नाकरतां समश्नुते ।।८।।

(नेपथ्ये)

**वैतालिकः**–विजयतां स्वातन्त्र्यैकरसो महाप्रतापो महाराजाधिराजः ।

जनपदहितदक्षा बाहुवीर्यप्रतिष्ठा
विबुधपतिसहायाः क्षात्रधर्मैकनिष्ठाः ।
दिनकरकुलधुर्या आत्मवन्तः स्वतन्त्रा
नियमितपरचक्रास्तेजसैवोत्तपन्ते ।।९।।

**प्रतापसिंहः**–(आकर्ण्य) सत्यं सर्वदा स्वायत्तसिद्धय एव रविकुलसंभवाः ।

**मन्त्री**–(विचिन्त्य) अपिच नह्यजनो जनपदो राज्यमजनपदं वा भवति । तत्पूर्वं तावदस्मज्जनपदोऽभये स्थापनीयः ।

**प्रतापसिंहः**–एतदप्युपपन्नम् । कः कोऽत्र भोः ।

(प्रविश्य)

**प्रतिहारः**–आज्ञापयतु देवः ।

**प्रतापसिंहः**–उद्घोष्यतामस्मद्वचनात्पुरग्रामनदीतीरव्रजादिषु यदात्मरक्षार्थं सर्वैः पौरजानपदैः सत्वरं शैलप्रदेश आश्रयणीयः । न चैवमुज्झिते प्रदेशे केनापि कृष्यादिकर्मानुष्ठेयम् । एतद्राजशासनातिक्रमणे त्वपरिहार्या देहान्तदण्डार्हता कृतागस इति ।

**प्रतिहारः**–तथा ।

(इति निष्क्रान्तः)

**प्रतापसिंहः**–(सोद्वेगम्) मन्त्रिवर्य,

कष्टं चिरायाचलवासनिश्चया–
न्मयोज्झितेयं यवनावमर्दिता ।
अरण्यभावेन समृद्धसस्या
वसुन्धरा मे परिणंस्यते ध्रुवम् ।।१०।।

---

**जनपदेति ।** *** मालिनीवृत्तम् ।

**मन्त्री**–प्रसीदतु देवः । अगतिका ह्येषा गतिर्मेवाडेश्वराणाम् ।

(नेपथ्ये)

**वैतालिकः**–विजयतां नयमार्गविचक्षणोऽमोघविक्रमो महाराजाधिराजः ।

समदनृपमभीक्ष्णं धर्षयित्वा रणाग्रे
प्रकटितपृथुवीर्यो यावनेशाभियुक्तः ।
यदुपतिरिव दुर्गे वासयित्वा स्वपौरान्
प्रतिहतपरमन्त्रो राजसे त्वं स्वतन्त्रः ।।११।।

**प्रतापसिंहः**–(आकर्ण्य) अहो स्वयमीश्वरांशेनावतीर्णेन भगवता क्षुण्ण एष मार्ग इति स्मरणेन पुनः प्रोत्साहिता वयम् । क कोऽत्र भोः ।

(प्रविश्य)

**प्रतिहारः**–आज्ञापयतु देवः ।

**प्रतापसिंहः**–दुर्गपालं द्रष्टुमिच्छामि ।

**प्रतिहारः**–तथा ।

(इति निष्क्रान्तः)

(प्रविश्य)

**दुर्गपालः**–विजयतां देवः ।

**प्रतापसिंहः**–वीर, द्वित्रैरहोभिः सपरिवारं प्रस्थास्यामो वयं शैलप्रदेशम् । तद्यावच्छक्यं परिपालयैतद्दुर्गराजम् ।

**दुर्गपालः**–देवस्य प्रभावेण स्वल्पबलोऽपि प्रभविष्याम्यहं युद्धोपकरणसंनद्धं दुरारोहमेतद्दुर्गराजं परिरक्षितुम् ।

नानाप्रहारपटुवीरभटोत्कटोऽयं
क्षुद्रावरोधकगणैः प्रतियुध्यमानः ।
दासस्त्वदन्नपरिपुष्टवपुर्ध्रुवं ते
प्राणात्ययेऽपि परिपालयिताऽग्र्यदुर्गम् ।।१२।।

---

**समदेति ।**– *** समदं नृपं मानसिहं पक्षे जरासन्धं *** यावनेशेन अकबरेण पक्षे बलियवनेन अभियुक्तः आक्रान्तः सन् यदुपतिः कृष्णः *** मालिनीवृत्तम् । उपमालंकारः ।

**नानाप्रहारेति**– *** वसन्ततिलकावृत्तम् ।



**प्रतापसिंहः**–वीर, प्रीतोऽस्मि तवोत्साहातिरेकेण । त्वं तावच्छीघ्रं प्रतिपद्यस्व स्वनियोगम् ।

**दुर्गपालः**–यदाज्ञापयति देवः ।

(इति निष्क्रान्तः)

(प्रविश्य)

**प्रतिहारः**–विजयतां देवः । देवं द्रष्टुकामो निषादपतिर्द्वारि तिष्ठति ।

**प्रतापसिंहः**–प्रवेशयैनम् ।

**प्रतिहारः**–तथा ।

(इति निष्क्रान्तः)

(प्रविश्य)

**निषादपतिः**–विजयतां देवः ।

(इति त्रिः प्रणम्य फलान्युपहरति)

**प्रतापसिंहः**–स्वागतं निषादाधिपतेः ।

**निषादपतिः**–देवस्य शैलावासप्रवणतामुपलभ्य संप्राप्तोऽस्म्यहं प्रवेष्टुं परिचारकगणम् । तद्यथार्हनियोगेनानुग्राह्योऽयं दासजनः । लघुरयं किं ममोपकरिष्यतीति नैवावधार्यम् । यतः

अल्पः कदाचिन्महता सुदुष्करं
कार्यं महत्साधयितुं भवत्यलम् ।
काष्ठैकपोतेन सुखोत्तरः प्रभो
हिरण्यनावा जलधिर्न तीर्यते ।।१३।।

**प्रतापसिंहः**–निषादपति, परितुष्टोऽस्मि तव राजनिष्ठातिशयेन । तदद्यैव नियुज्यसे त्वमस्मदाटविकबलस्याधिपत्ये ।

**निष्दपतिः**–महानेषोऽनुग्रहः स्वातन्त्र्यैकरसस्य देवस्य मयि दासजने ।

**प्रतापसिंहः**–वीर, परिचिताशेषशैलसंक्रमस्त्वमतः परं भविष्यसि मे परमः सहायः ।

---

**अल्प इति ।** *** उपजातिवृत्तम् । अर्थान्तरन्यासोऽलंकारः ।

**निषादपतिः–**(सप्रश्रयम्) अहो अद्य मे सफलं जन्म ।

**प्रतापसिंहः–**तत्त्वमाटविकदलं सज्जीकृत्यास्मज्जानपदपौराणामावासयोग्यान् शैलाभ्यन्तरभूमिभागानुपकल्प्य तत्र परिपालयास्मदुपागमनम् ।

**निषादपतिः–**तथा ।

(इति निष्क्रान्तः)

**प्रतापसिंहः–**मन्त्रिन् सर्वथाऽनुकूलं दैवमिति तर्कये ।

**मन्त्री–**अथ किम् । स्वातन्त्र्यप्रियस्यैकलिङ्गाधिष्ठितस्य महाराजस्य कालेन सर्वेऽपि भविष्यन्त्यनुकूला व्यतिकराः ।

**प्रतापसिंहः–**अहं तावदन्तःपुरमुपसृत्य प्रयाणप्रबन्धं प्रकल्पये । कः कोऽत्र भोः ।

(प्रविश्य)

**प्रतिहारः–**आज्ञापयतु देवः ।

**प्रतापसिंहः–**अन्तःपुरमार्गमादेशय ।

**प्रतिहारः–**इत इतो देवः । (उभौ परिक्रामतः) एतदन्तःपुरद्वारं प्रविशतु देवः।

(इति निष्क्रान्तः)

(ततः प्रविशति राजपुत्रीसहिता महिषी)

**प्रतापसिंहः–**(प्रविश्य) देवि जातः खलु शैलधिवासनिर्णयः ।

**महिषी–**(सहर्षं) प्रीताऽस्म्यार्यपुत्रस्य शैलाधिवासाध्यवसायेन ।

**प्रतापसिंहः–**अगतिका ह्येषा गतिः स्वातन्त्र्यपरिपालनाय ।

**महिषी–**आर्यपुत्र स्वातन्त्र्यमेव राजन्यस्य वीर्यम् । अपिच

नानारसैः स्वादुफलैः सुपोषितः
स्नेहेन राजन्यकुलोपलालितः ।
शुकोऽपि चामीकरपञ्जरश्रितो
न पारतन्त्र्यं बहु मन्यते खगः ।।१४।।

तत्किं पुनस्तेजस्विनो लोकपालाः ।

---

**नानारसैरिति ।** – *** उपजातिवृत्तम् ।



**प्रतापसिंहः–**अथ किम् । किं तु प्रकृतिकोमलस्यान्तःपुरजनस्यायासबहुलः शैलाधिवासो नितरां क्लेशाय भविष्यतीति व्याकुलोऽस्मि ।

**महिषी–**प्रसीदत्वार्यपुत्रः । परिचितमृगयाविहाराणां क्षत्राङ्गनानां तु

घनविरूढफलाश्रितपादपं
मधुरनिर्झरवारिपरिस्रवम् ।
द्विजततेर्विरुतैश्च निनादितं
व्रजति नन्दनतां गिरिकाननम् ।।१५।।

एषा पृथ्वीराजस्य भगिन्यपि विहाय मोगलराजधानीविलासान् शैलाधिवासमेवाभिनन्दति ।

**प्रतापसिंहः–**वत्से, उपप्लवबहुलो हि शैलाधिवासः ।

**महिषी–**वत्से, कथमकारणमात्मानं क्लेशपदं नेतुमुत्सहसे । वीरगणपरिरक्षिता त्वं सुखं प्रतिष्ठस्व हस्तिनापुरम् ।

**राजपुत्री–**अम्ब, निसर्गत एव स्वातन्त्र्यप्रियाः सन्ति क्षत्रकन्यकाः । तद्

यवननृपकुलाङ्गनाऽवधूता
नटविटवृन्दविडम्बनाऽवसन्ना ।
नियमितसुखसंचराऽस्वतन्त्रा
न जननि जीवितुमुत्सहे पुरेऽस्मिन् ।।१६।।

**प्रतापसिंहः–**अस्तु । (पुरतो विलोक्य) एष युवराज इत एवोपसर्पति ।

(ततः प्रविशति युवराजः)

**राजपुत्री–**(युवराजं वीक्ष्य स्वगतम्) अहो नु खलु

उपनतनवयौवनाऽभिरामः
स्मितवदनः कमनीयकुन्तलोऽयम् ।
कमपि मधुरदर्शनः कुमारो
जनयति मे शुचि मानसे विकारम् ।।१७।।

---

**घनविरूढेति** – *** द्रुतविलम्बितवृत्तम् । गिरिकाननं नन्दनतां व्रजतीति समर्थनसापेक्षस्य घनविरूढेत्यादिना समर्थनात्काव्यालिङ्गमलङ्कारः ।

**यवनेति–***** पुष्पिताग्रावृत्तम् ।

**युवराजः–**अभिनन्दितं महाराजस्योद्घोषणं पौरजनैः ।

**प्रतापसिंहः–**साधु वत्स पौरजनानुरागायत्ता हि राष्ट्रसंपदः । कः कोऽत्र भोः।

**युवराजः–**(राजपुत्रीं निर्वर्ण्य स्वगतम्) अहो न्वकाण्ड एव

नवानुरागाञ्चितलोललोचना
बालेयमारोहति मेऽञ्जसा मनः ।
वामभ्रुवां मुग्धमपाङ्गवीक्षितं
क्षणेन यूनां विजयाय कल्पते ।।१८।।

(प्रविश्य)

**कञ्चुकी–**आज्ञापयतु देवः ।

**प्रतापसिंहः–**सद्य एव प्रस्थानाभिमुखा भवन्तु सर्वेऽन्तःपुरनिवासिनो जनाः।

**युवराजः–**(आत्मानं मुहुर्मुहुरवलोकयन्तीं राजपुत्रीं निरीक्ष्य स्वगतम्)

अहो न्वियं पूर्णमृगाङ्कशीतला
सुधारसैः सिञ्चति मामभीक्ष्णम् ।
हरप्रकोपानलदग्धविग्रहं
बालेयमुज्जीवयति स्मरं पुनः ।।१९।।

**कञ्चुकी–**तथा ।

(इति निष्क्रान्तः)

**प्रतापसिंहः–**तावद्वयमपि प्रस्थानप्रवणा भवेम ।

(इति निष्क्रान्ताः सर्वे)

।। समाप्तोऽयं **शैलदुर्गाश्रय**नामा चतुर्थोऽङ्कः ।।

---

**नवेति –** *** उपजातिवृत्तम् । अत्र युवराजराजपुत्रीप्रणयरूपस्य पताकावृत्तस्यारम्भः । तदुक्तं दर्पणे–'व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते ।' इति ।

**अहो न्वियमिति ।–** *** उपजातिवृत्तम् ।

**इति श्रीप्रतापविजयटीकायां सर्वाङ्गविद्योतन्यां**
**शैलदुर्गाश्रयनामा चतुर्थोऽङ्कः समाप्तः ।**

## पञ्चमोऽङ्कः ।

(ततः प्रविशन्ति शैलाधित्यकायां क्रीडन्त्यः कञ्चुकिनाऽधिष्ठिता राजकन्याः)

**प्रथमा–**(ससंभ्रमम्) अयि गृहाणैतं स्रोतसाऽपोह्यमानं कुसुमकन्दुकम् ।

**द्वितीया–**सुदूरमाकृष्ट एष प्रवाहवेगेन ।

**तृतीया–**युवामपसरतम् । इयमहं प्रत्यानयामि ।

(इति सख्यावपसार्यानयति)

**प्रथमा–**(सभ्रूभङ्गम्) पुंवत्प्रगल्भमानैषाऽभीक्ष्णं मां वज्रसारेण हस्तेन प्रहरति।

**द्वितीया–**(सपरिहासम्) अमरेन्द्र एवार्हत्यस्या वज्रसारं हस्तं पीडयितुम् ।

**तृतीया–**(सरोषमिव) अलं तव वाक्चापलेन ।

**द्वितीया–**अयि नायं परिहास । यतः

ऊर्जस्विनं शीलगुणान्वितं वरं
क्षत्रात्मजा कामयते मनोरमम् ।
उल्लोलवीचिक्षुभिता तरङ्गिणी
समीरवेगेन समेति सागरम् ।।१।।

**तृतीया–**स्निग्धे सर्वत्र सान्तरायोऽस्ति प्रार्थितोदयः कन्यकाजनस्य ।

**द्वितीया–**हला किमेवं मिथ्याविकल्पनैरात्मानं क्लेशपदं नयसि ।

मुकुलितां मधुसौरभसंयुता–
मुपचितावयवां विपिनश्रियम् ।
नवरसाङ्कुरितां नवमल्लिकां
मधुकरो न विहातुमयि क्षमः ।।२।।

**तृतीया–**(ऊर्ध्वं विलोक्य स्वगतम्) जातः खलु संकेतसमयः । (प्रकाशम्) अयि पश्यैष

---

**ऊर्जस्विनमिति ।** *** उपजातिवृत्तम् ।

**मुकुलितामिति ।** *** द्रुतविलम्बितं वृत्तम् । अप्रस्तुतप्रशंसालङ्कारः ।

तृणलतास्तरणां विमलस्रवां
प्रचुरपल्लवरञ्जितपादपाम् ।
गिरिभुवं परिसर्पिपयोधरां
नयति काञ्चनतामुदितो रविः ।।३।।

**प्रथमा–**नूनमुपभोगार्हः खल्वयं शैलाभोगः । यतः
कुसुमितद्रुमराजिसमावृता
सुरभिगन्धवहैरधिवासिता ।
अनियतालिविहारहिताऽऽयता
हरति कस्य मनो न नगस्थली ।।४।।

**कञ्चुकी–**(स्वगतम्) अहो निसर्गत एव नवताभिनिविष्टो युवजनः ।

**द्वितीया–**अयि किमित्ययमेकपदे बालारुणमावृत्य तिष्ठति बलाहकः ।

**तृतीया–**(दक्षिणाक्षिस्पन्दनं सूचयित्वा स्वगतम्) हा कथमनिष्टमाशङ्कते ते हृदयम्। अथवा किं नाम भाव्यर्थसूचकत्वमङ्गविकाराणाम् ।

**प्रथमा–**(जनान्तिकम्) अयि पश्यैषा किमपि विचिन्तयन्त्यनवहितेव लक्ष्यते। तावदेहि कुसुमावचयार्थमितस्ततः परिक्रमावहे ।

(इति निष्क्रान्ते)

**कञ्चुकी–**(दूरं विलोक्य स्वगतम्) एष राजकन्यकायां नितरां बद्धभावः कुमार इत एवाभिसर्पति ।

(ततः प्रविशति युवराजः)

**कञ्चुकी–**स्वागतमायुष्मतः ।

**तृतीया–**(ससंभ्रमम्) स्वागतं रविकुलतिलकस्य ।

**युवराजः–**अपि सुखायते शैलाधिवासः ।

**तृतीया–**अथ किम् । एते खलु

---

**तृणलतेति ।** *** द्रुतविलम्बितं वृत्तम् ।
**कुसुमितेति ।** *** द्रुतविलम्बितं वृत्तम् ।



उत्तुङ्गाद्रिविलासाः
सवयोभिः सेविताः सहचरीभिः ।
आशाबन्धनिबद्धं
प्रसादयन्त्यन्तरङ्गमुन्मदानाम् ।।५।।

(इति कुमारेण सह परिक्रामति)

**युवराजः–**(निःश्वस्य स्वगतम्) हा कष्टम् ।
एकान्ततो मत्प्रणयाकुलां कथं
संतर्जयेऽहं कुलधर्मनिष्ठया ।
मनः कृशाङ्ग्या बिसतन्तुकोमलं
सहिष्यते नैव निषेधरौक्ष्यम् ।।६।।

तत्प्रकारान्तरेणैनां सान्त्वयिष्ये । (प्रकाशम्) अयि राजपुत्रि, सर्वथा परवशे मयि नोचितस्तवेदृग्भावानुबन्धः । यतः
दृढानुरागेण वशीकृतोऽप्यहं
नैवास्म्यलं पूरयितुं मनोरथम् ।
विशुद्धवंशप्रभवस्य शोभने
गुरोर्निदेशः परमा गतिर्मम ।।७।।

**तृतीया–**(साक्षेपम्) धर्मवीर, परं प्रीणयति मां तव धर्मानुरागः । अतः परं महाराजस्यानुज्ञासंपादनेनात्मानं कृतार्थतां नेतुं प्रयतिष्ये ।

**युवराजः–**अयि सुन्दरि, एतदप्यसंभाव्यम् । यतो दिवि वा भुवि वा न कोऽपि पारयते व्रतनिर्बन्धपरं महाराजमनुनेतुम् ।

**तृतीया–**(सावष्टम्भम्) न कदापि प्रार्थितफलाधिगमं प्रति मन्दोत्साहा भवन्ति क्षत्राङ्गनाः । तत्
सपद्यहं विक्रमपक्षपातिनं
प्रसादयिष्ये तममोघविक्रमैः ।

---

**उत्तुङ्गेति ।** *** अत्र आशाबन्धनिबद्धमित्यनेन राजपुत्र्या युवराजे प्रणयातिरेको व्यज्यते ।
**सपद्यहमिति ।** *** उपजातिवृत्तम् ।

आराध्य शौर्येण पिनाकिनं पुरा
प्राप्तं जयेनासुलभं महास्त्रम् ।।८।।

**युवराजः**–राजपुत्रि, क्षमस्व मम धर्मानुरागजं नैष्ठुर्यम् । अहमपि यावच्छक्यं प्रयतिष्ये तातमनुकूलयितुम् ।

(प्रविश्य)

**प्रतिहारः**–विजयतां कुमारः । शैलाग्रमधिरूढो देवः कुमारं द्रष्टुमिच्छति ।

**युवराजः**–अथामन्त्रये राजपुत्रीम् ।

**तृतीया**–(सनिर्वेदम्) पुनरप्यनुगृह्णात्विमामबलामचिरदर्शनेन ।

**युवराजः**–तथा । (प्रतिहारं प्रति) आदिश तावदारोहमार्गम् ।

**प्रतिहारः**–इत इतः कुमारः ।

(उभौ परिक्रामतः)

**युवराजः**–(स्वगतम्) हा कष्टं कुलव्रतभङ्गभीरुणा मया प्रत्यादिष्टेयं मदनातुरा कदाचिदनिष्टमप्याचरेत् । परंतु

ललितसुमनोरागासक्तां मनोहरपल्लवां
परिमलगुणै रम्योपान्तां विलोलनवच्छदाम् ।
हिमगिरिसरोमार्गे खिन्नः खगोऽप्यशनाकुलः
स्थलकमलिनीं नैवाश्लिष्यत्यपास्य कुलव्रतम् ।।९।।

(ततः प्रविशति शैलाग्रमधिरूढः प्रतापसिंहः)

**युवराजः**–(उपसृत्य) आज्ञापयतु महाराजः ।

**प्रतापसिंहः**–वत्स संप्रति प्रबलपरिपन्थिपरावृतैरस्माभिर्विषयाभिष्वंगं परित्यज्य सततं रिपुदलमर्दनेन शैलावासविक्लवाः प्रजा रक्षणीयाः । वत्स सर्वथा दुर्वाह्यो हि राज्यभरः ।

षाड्गुण्यप्रमुखप्रयोगमथितप्रत्यर्थिसंघाकुलं
चिन्ताजागरविप्रवासजनितक्लेशावहं दुर्धरम् ।

---

**षाड्गुण्येति ।** *** शार्दूलविक्रीडितवृत्तम् ।



दुर्दान्तैर्व्यसनप्रमूढमतिभिर्वोढुं सदैवाक्षमं
राज्यं नाम नृपस्य वत्स विषमं निस्त्रिंशधाराव्रतम् ।।१०।।

(दूरं निर्दिश्य) वत्स पश्यैतानस्मदन्वेषणायोपत्यकायां पर्यटतो यवनसंघान् । वनेचरसहायः सत्वरं तान् व्यापादय ।

**युवराजः**–यदाज्ञापयति देवः ।

(इति निष्क्रान्तः)

(नेपथ्ये)

विजयतां मेवाडमार्तण्डो भारतैकवीरो महाराजः प्रतापसिंहः ।

**प्रतापसिंहः**–(आकर्ण्य सविस्मयम्) अहो संप्राप्तो रविकुलकवीश्वरः ।

(प्रविश्य)

**कवीश्वरः**–विजयतां तपनान्वयोद्वहो महाप्रतापो महाराजाधिराजः ।

**प्रतापसिंहः**–स्वागतं कवीश्वरस्य । चिरविप्रयुक्ते प्रतापे महानेषोऽनुग्रहः ।

**कवीश्वरः**–महाराज निसर्गसिद्धो हि राज्ञि कविकुलस्यानुषङ्गः ।

यथा वसन्ते नवपल्लवोद्गमो
घनोदयः प्रावृषि लोकनन्दनः ।
तथा नृपेन्द्रे नियतानुषङ्गिणः
शब्दार्थसिद्धाः कवयो रसेश्वराः ।।११।।

अपि चोभयसाधारणे हि रसेश्वरत्वे राज्ञां कवीश्वराणां प्रीतियोगोऽपि सुलभः।

**प्रतापसिंहः**–(सस्मितम्) संप्रति न वयं रसेश्वराः परंच केवलं शैलेश्वराः ।

**कवीश्वरः**–कुलधर्म एवैष दिनकरकुलस्य यत्प्रतिकूले दैवे शैलसंश्रयः । परं त्वेतेन न रसेश्वरत्वस्य व्यपगमः । पुनरप्यचिरेण राज्यश्रिया संयोक्ष्यते महाराज इत्याशास्महे ।

**प्रतापसिंहः**–प्रतिगृहीताशीः ।

**कवीश्वरः**–एतावता कालेन नानाजनपदान् परिक्रम्याकलितं सकलमुदन्तजातं महाराजं श्रावयितुमद्य संप्राप्तोऽस्मि शैलप्रदेशम् । अतः परं भविष्यत्येष गिरिरेव ममाधिवासः ।

**प्रतापसिंहः**–नितरामनुगृहीताः स्मः । कवीश्वराणां सान्निध्येन विनोदप्रचुरः संपत्स्यतेऽस्मच्छैलावासः । कः कोऽत्र भोः ।

(प्रविश्य)

**प्रतिहारः**–आज्ञापयतु देवः ।

**प्रतापसिंहः**–प्रापयैनं कवीश्वरं राजकुलोपकार्याम् । मद्वचनादुच्यतां तत्राधिकृतः कोशाध्यक्षो यन्महार्हरत्नैः प्रसाद्य राजोपचारैः संभावयैनं कवीश्वरमिति ।

**प्रतिहारः**–तथा ।

(इति कवीश्वरेण सह निष्क्रान्तः)

(नेपथ्ये कलकलः)

**प्रतापसिंहः**–अहो किं नु खलु स्यात् ।

**प्रधानमन्त्री**–(दूरं विलोक्य) एषा विक्रमशालिनी पृथ्वीराजभगिनी स्वयमित एवोपसर्पति ।

(प्रविश्य)

**राजकुमारी**–वर्धतां देवो विजयेन । परास्ता मया वनेचरसाहाय्येन प्रच्छन्नं प्राङ्गणमुपगताः परिपन्थिगणाः ।

**प्रतापसिंहः**–साधु राजपुत्रि साधु । स्वकुलानुरूपमेव त्वया विक्रान्तम् ।

शौर्यं च गुरुशुश्रूषा पत्युरेवानुवर्तनम् ।
चारित्र्यशुद्धिरौदार्यं गुणाः क्षत्राङ्गनोचिताः ।।१२।।

वत्से प्रसन्नोऽस्मि तव शौर्यातिरेकेण ।

**राजकुमारी**–तत्कृपयाऽनुजानातु ममैकामभ्यर्थनाम् ।

लज्जां विहायाद्य कुलाङ्गनोचिता–
मभ्यर्थये तात चिरेप्सितं वरम् ।
न वै प्रसादस्तपनान्वयानां
संपादितो निष्फलतां प्रयाति ।।१३।।

**प्रतापसिंहः**–(सखेदम्) अयि मित्रभगिनि । क्षमस्व मम व्रतनिर्बन्धम् ।



तुष्टस्तवोपासनया प्रतापो
जिहासतीन्द्रानुजवत् प्रतिज्ञाम् ।
समुद्रसत्यव्रतयोस्त्वसंशयं
वेलाविभङ्गो जगतः क्षयाय ।।१४।।

तद्यावज्जीवं सुतनिर्विशेषायास्तव भवत्वस्मत्कुले स्थिरनिवासः ।

**राजकुमारी**–(सनिर्वेदम्) महानेषोऽनुग्रहो महाराजस्य । (स्वगतम्) अतः परं

नित्यं प्रियाननविलोकननन्दितैवं
नेष्याम्यहं परिणतिं ननु जीवितं मे ।
ज्योत्स्नां निपीय नितरां मुदिता चकोरी
नाकांक्षते ह्यसुलभं द्विजराजयोगम् ।।१५।।

(इति निष्क्रान्ता)

**प्रतापसिंहः**–मन्येऽवगतमस्मद्गूढनिकेतनं परिपन्थिचारैः । तदितोऽविलम्बेनापसरणमेव श्रेयः ।

**प्रधानमन्त्री**–अथ किम् ।

**प्रतापसिंहः**–श्रुतं मया प्रणिधिभ्यो यदेकेन राष्ट्रद्रोहिणा कृषीवलेनास्मच्छासनमतिक्रम्य – उंटालाग्रामाधिपस्यादेशमनुरुध्य–उप्तानि भङ्गाबीजानि तत्परिसरावस्थिततुरुष्कसेनानिवेशमध्यवर्तिनि महाक्षेत्रे । तदस्य पापाचारस्य सद्यो वधार्थं प्रतिष्ठामहे ।

(इति निष्क्रान्ताः सर्वे)

।। समाप्तोऽयं **शैलविहारो** नाम पञ्चमोऽङ्कः ।।

---

**तुष्टस्तवेति ।** *** यथा कुरुक्षेत्रे भीष्मस्य भक्त्या परितुष्टेन कृष्णेन शस्त्रमादाय प्रतिज्ञा त्यक्ता तथा अहमपि त्यक्तुं इच्छामि इति तात्पर्यम् । तु परंतु समुद्रस्य सत्यव्रतस्य च वेलाविभङ्गः मर्यादालोपः असंशयं ध्रुवं जगतः क्षपाय भवति । अतः लोकसंग्रहार्थं प्रतिज्ञां न त्यक्ष्ये इत्यर्थः ।

**नित्यमिति ।** *** वसन्ततिलकावृत्तम् । अर्थान्तरन्यासालङ्कारः ।

**इति श्रीप्रतापविजयटीकायां सर्वाङ्गविद्योतन्यां**
**शैलविहारनामा पञ्चमोऽङ्कः समाप्तः ।**

## षष्ठोऽङ्कः ।

(ततः प्रविशतः सार्वभौमोपवनगतौ राजपुरुषौ)

**प्रथमः**–नूनमतीव मोदमावहति प्रत्यूषेषूपवनचर्या ।

**द्वितीयः**–अथ किम् । भद्र पश्य

एते तालतमालराजिनिलयानुज्झन्ति चित्राः खगा–
स्तुण्डैर्दाडिमबीजलुञ्चनचणैर्वल्गन्ति केलीशुकाः ।
द्राक्षामण्डपमाशु चन्द्रकरुचा मण्डन्ति केकावलाः
प्रत्यग्रैरधिवासितो मलयजैर्मूर्च्छत्यमन्दानिलः ।।१।।

तथैव

जातीरसाचम्पकपाटलावृते
बालारुणेनारुणिते सरस्तटे ।
प्रफुल्ललोलाम्बुजलास्यलालिता
लसन्ति रम्याः कलहंसकेलयः ।।२।।

**प्रथमः**–(दूरं विलोक्य) भद्र, एतैर्नवविरचितैः पटमण्डपैः संनिहित इव लक्ष्यते सार्वभौमस्य हृदयंगमो नौरोजमहोत्सवः ।

**द्वितीयः**–अथ किम् । तत्संविधानायैवाज्ञप्तोऽस्मि देवेन ।

**प्रथमः**–भद्र, साभ्यसूयोऽस्मि तव सौभाग्यातिशये । मम पुनर्यातायातेन कष्टप्रायमेव नियोगानुष्ठानम् ।

**द्वितीयः**–अप्युपलब्धा काचित्प्रवृत्तिर्मेवाडेश्वरस्य ।

**प्रथमः**–कुतः संभाव्यते नामैतत् । अपिच व्यापाद्यते प्रच्छन्नाभियोगैः शतशो यवनमृगा अनेन राजकेसरिणा । तत्र नियुक्ताः सेनानायकास्तु

---

**एत इति ।** *** शार्दूलविक्रीडितं वृत्तम् ।

**जातीति ।** *** उपजातिवृत्तम् ।



कादम्बरीपानविघूर्णलोचना
मृदङ्गवीणास्वरतालरञ्जिताः ।
वाराङ्गनाश्लेषविलुप्तचेतना
विलासयोगैः क्षपयन्ति कालम् ।।३।।

किं न श्रुतं त्वया यदुपेत्यास्मत्सेनानिवेशं पशुघातं हतवानेकं कृषीवलमयं साहसिकः क्षत्रेश्वर इति ।

**द्वितीयः**–कच्चिद्विदितमेतत्सार्वभौमस्य ।

**प्रथमः**–भद्र, नास्ति किंचिदप्यविदितं चारचक्षुषः सार्वभौमस्य । परंतु अस्मदादिष्वनागःस्वपि परिचारकेषु सुलभकोपा लोकेश्वराः सापराधेषु महामात्रेषु पुनरनुरज्यन्ते । सर्वत्राल्पीयसामेव विघातः ।

**द्वितीयः**–कियदवधि प्रवर्तिष्यतेऽयं मृषाविग्रहः ।

**प्रथमः**–संप्रति सार्वभौमशरणमन्विष्यति प्रतापसिंहः इति संदिष्टमस्मत्सेनाधिपतिना ।

**द्वितीया**–किमिदं भूतार्थख्यापनम् ।

**प्रथमः**–सार्वभौमप्ररोचनार्थं स्यान्नामैषा प्रयुक्तिः । सेनाधिपतिना तु मेवाडवीरस्य मुखमपि नावलोकितम् ।

**द्वितीयः**–दुरवगाह्यः खलु सार्वभौमनयः ।

**प्रथमः**–अथ किम् । अहं तावत् राजकुलमुपेत्य श्रावयामि सार्वभौमं सकलमुदन्तजातम् ।

---

**कादम्बरीति ।** *** उपजातिवृत्तम् ।

**पशुघातमिति ।** –अत्र 'उपमाने कर्मणि च'–इत्यनेन णमुल् । तेन पशुमिव हतवानित्यर्थः ।

**महामात्रेति ।** मन्त्रे कर्मणि भूषायां वित्ते माने परिच्छदे ।
मात्रा च महती येषां महामात्रास्तु ते स्मृताः ।।

**श्रावयामीति ।** अत्र–'गतिबुद्धि'–इति सूत्रेण सार्वभौममित्यस्य कर्मत्वम् ।

**द्वितीयः**–अहमपि स्वं नियोगं परिपालयामि ।

(इति निष्क्रान्तौ)

**विष्कम्भकः ।**

(ततः प्रविशति मन्त्रगृहावस्थितो मन्त्रिसहितः सपरिवारः सार्वभौमः)

**सार्वभौमः**–(मनः समाधाय स्वगतम्)

यत्र कुत्र गतं नाथ येन केनापि संगतम् ।
यां कामपि दशां प्राप्तं दृशा नन्दय ते जनम् ।।४।।

(इति स्तौति)

**तानसेनः**–(वीणावाद्येन गायति)

**(कर्णाटरागेण अठ (ध्रुपद) तालेन गीयते ।)**

ललितनवकदम्बमालविलसिततनुगोपबाल–
लीलापतिरेष कोऽपि वादयते वेणुम् ।। ध्रुवपदम् ।।

मृगमदाङ्कतिलकभालमञ्जुस्वनरचितजाल–
लीलागतिरेष कोऽपि वादयते वेणुम् ।। ललित० ।।१।।

चपलनयनघनश्यामसस्मितवदनाभिराम–
लीलारतिरेष कोऽपि वादयते वेणुम् ।। ललित० ।।२।।

वृन्दावनवल्गुकुञ्जसुमनोरसिकालिगुञ्ज–
लीलामतिरेष कोऽपि वादयते वेणुम् ।। ललित० ।।३।।

**सार्वभौमः**–हन्त ललितपदविन्यासेन गेयपदेन वयं पुनर्नवीकृताः । (विचिन्त्य) अमात्य, अपि निर्मिता सकलव्यवहारक्षमा श्रुतिमनोहरा नवीना राष्ट्रभाषा ।

---

**विष्कम्भक इति ।**–तल्लक्षणमुक्तं दर्पणे– 'वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः । संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ।।' इति ।।



**अमात्यः**–सार्वभौमस्यादेशमनुरुध्योद्धृता मया सुगमा रमणीया राष्ट्रभाषा । नानाजनमनोरञ्जनक्षमैषा उर्दुपदेन व्यपदेशमर्हति ।

**सार्वभौमः**–अभिनन्द्यते तव वैदग्ध्यविभवः । अद्यप्रभृति प्रवर्तिष्यन्तेऽस्यामेव भाषायां मम सर्वेऽपि साम्राज्यव्यवहाराः ।

**अमात्यः**–अधिराजव्यवहारमेवानुर्वतन्ते सर्वाः प्रकृतयः । तदचिरेण भविष्यति सर्वत्र सुलभो देवस्याभीष्ट एकभाषाप्रचारः ।

(प्रविश्य)

**चरः**–(त्रिः प्रणम्य) विजयतां सार्वभौमः । समन्ततो वणिक्पथानवरुध्य गुर्जरसार्थवाहेभ्योऽधिराजोपभोगार्हाणि महार्हरत्नानि स्वयमेव परिक्रीय तान् परावर्तयते शैलदुर्गाश्रितः प्रतापः ।

(इति निष्क्रान्तः)

**सार्वभौमः**–अहो नाद्यापि शिथिलावष्टम्भो लक्ष्यतेऽयं प्रतापः ।

**प्रधानमन्त्री**–सार्वभौमस्याप्रतिहतप्रभावापहृतधैर्यः क्षिप्रमेवान्विष्यत्यसौ सार्वभौमस्य शरणम् । यतः

विना विवेकं प्रतिपद्य साहसं
महद्विरोधं किल यश्चिकीर्षति ।
विपद्विभिन्नः स जनोऽल्पसाधनः
क्षुब्धार्णवे नौरिव विप्रणश्यति ।।५।।

**मन्त्री**–उत्कृष्टकुलाभिमानोपसृष्टोऽयं क्षुद्रो नृपालो दुर्दैवप्रेरित इव सार्वभौमं तदनुग्रहशालीन्यशेषक्षत्रकुलानि च विद्वेष्टि । अतः प्रत्यासन्न एवास्य भाग्यविप्लवः।

**अमात्यः**–धर्मतत्त्वसंमूढोऽयं भारतहितैकतत्परस्य सार्वभौमस्योदात्तनयमवगणय्य केवलं स्वकुलध्वंसमेवामन्त्रयते ।

**सार्वभौमः**–यत्सत्यं सकलभारतीयनृपालेष्वयमेक एव धर्ममूढोऽस्मदुदात्तनयस्यान्तरायो भवति येन खलु व्याहन्यन्ते महान्तोऽप्यस्मदुपक्रमाः।

**मोगलयुवराजः**–(सामर्षम्) किमित्येतादृशाः प्रतिमोपासनपरिग्रहपरा जाल्मा नोन्मूल्यन्ते तातचरणैः ।

**सार्वभौमः**–(विचिन्त्य) वत्स, अनभिज्ञोऽसि खलु लोकाधिकारतन्त्रनिगमस्य। त्वदभिप्रायेण तु मया षड्भागावशेषः कर्तव्योऽयं विस्तीर्णो जनपदः । वत्स परस्परविद्वेषतो विलुप्यमानस्य लोकस्य परित्राणायेश्वरांशेनावतीर्णेन कथं मया घातयितव्यास्तत्सृष्टा नानाधर्माणः पौरजानपदसंघाः । अपिच सन्ति हि प्रतिमोपासननिर्बन्धपरेषु धीवैभवप्रथिता बहवो नरपुंगवा ये खलु विविधविद्याकलाकलापैरुपकुर्वन्ति जगत्तन्त्रस्य । सर्वथोपेक्षणीया हि लोकाधीश्वरेण प्रजाजनस्य निरुपद्रवाः प्रवृत्तयः ।

**प्रधानमन्त्री**–चिरं जीवतु लोकोत्तरविक्रमौदार्यमहिम्ना राजमानो राजाधिराजः।

**सार्वभौमः**–मिथःकलहकलुषितानां भारतीयानां संघटनार्थं विश्वाधिनाथेन सार्वभौमाधिकारपदे नियुक्ता वयं विहाय स्वधर्मनिर्बन्धं तत्सिद्ध्यै सर्वात्मना सततं प्रवृत्ताः ।

**प्रधानमन्त्री**–अथ किम् । परं त्वत्राऽपि प्रत्यवतिष्ठन्ते मन्दमतयः प्रतापप्रमुखा राजानकाः ।

**सार्वभौमः**–(विचिन्त्य) मन्त्रिन्, एवमस्मन्नयप्रत्यवायभूतोऽपि

उदात्तगुणसंपदा नयगुणैश्च संधुक्षितः
    प्रचण्डसमराङ्गणेऽप्रतिमविक्रमैर्विश्रुतः ।
गतोऽपि रिपुतामयं रविकुलोद्भवः पार्थिव–
    स्तदादरपरायणं मम पुनर्विधत्ते मनः ।।६।।

**प्रधानमन्त्री**–धन्यं हि सार्वभौमस्य गुणपक्षपातित्वम् ।

(प्रविश्य)

**गूढचरः**–(त्रिः प्रणम्य) विजयतां सार्वभौमः । सार्वभौमचरण–रचिताञ्जलिरावेदयति सेनानायको यत्सार्वभौमप्रभावाभिभूतः प्रतापः देवं सार्वभौमपदेन व्यपदिश्य स्वातन्त्र्यनिर्बन्धमपहाय सार्वभौमस्य शरणमन्विष्यति इति ।

(इति निष्क्रान्तः)

**सार्वभौमः**–(स्वगतम्) सर्वथाऽश्रद्धेयं सेनापतेर्वचनम् । यतः

**उदात्तेति ।** *** पृथ्वीवृत्तम् ।



न मनाग् विकलव्रतो न वाऽयं
    प्रकृतिद्रोहपराहतप्रभावः ।
नयगुणनिपुणो मदावलिप्तः
    किमिति भवेच्छरणोन्मुखो ममैवम् ।।७।।

(प्रकाशम्) नूनमद्य सफलतां यातोऽस्माकं मनोरथः । (पृथ्वीराजं प्रति साकूतं सस्मितं च) सामन्तवर्य, संप्रत्यस्मान्सार्वभौमपदेन व्यपदिश्यान्विष्यत्यस्मच्छरणं तव स्वातन्त्र्यैकरसः प्रियवयस्यः ।

**पृथ्वीराजः**–(साक्षेपम्) सार्वभौम, सर्वथाऽलीकोऽयं गूढप्रणिधेः प्रवादः ।

विषममुपगतोऽप्ययं यदि त्वां
    सकृदधिराजमुदाहरेदजय्यः ।
सुरसरिदवशं वहेत्प्रतीपं
    तपनकरोऽप्युदियात्तदा प्रतीच्याम् ।।८।।

(सावष्टम्भम्) तदत्रैव सार्वभौमसभायां मया प्रतिज्ञायते यत्सकल–साम्राज्यप्रभावेणापि नैनं सूर्यकुलोद्भवं क्षत्रवीरं कदापि वशीकर्तुं प्रभविष्यति सार्वभौम इति ।

**सार्वभौमः**–(सस्मितम्) अहो बलवांस्तव सुहृदि पक्षपातः ।

**पृथ्वीराजः**–नायं मित्रस्य पक्षपातः किंतु परमार्थप्रख्यापनमेव ।

**सार्वभौमः**–तावत्तव प्रणिधिद्वारा तथ्यमाशु विज्ञायास्मभ्यं निवेदय ।

**पृथ्वीराजः**–यदाज्ञापयति सार्वभौमः ।

(इति पत्रं लिखति)

**सार्वभौमः**–कः कोऽत्र भोः ।

(प्रविश्य)

**प्रतिहारः**–आज्ञापयतु देवः ।

**न मनागिति** – *** औपच्छन्दसिकम् । अत्र कौटल्यः–‘आत्मवांस्त्वल्पदेशोऽपि युक्तः प्रकृतिसम्पदा । नयज्ञः पृथिवीं कृत्स्नां जयत्येव न हीयते ।’ (अर्थशास्त्र–सं०कंगले. अधि० ६, अ० १.१८)

**विषममिति ।** *** औपच्छन्दसिकम् । संभावनालङ्कारः–तल्लक्षणं ‘संभावना यदीत्थं स्यादित्यूहोऽन्यस्य सिद्धये ।।’ इति ।

**सार्वभौमः**–अन्तगृहमार्गमादेशय ।

**प्रतिहारः**–इत इतो देवः । (उभौ परिक्रामतः) एतदन्तर्गृहद्वारं प्रविशतु देवः।

(इति निष्क्रान्तः)

(ततः प्रविशत्यन्तर्गृहावस्थिता सपरिवारा महिषी)

**महिषी**–स्वागतं सार्वभौमस्य ।

**सार्वभौमः**–(प्रविश्योपविश्य च) अयि सुभगे किमित्यप्रसन्नेव लक्ष्यसे ।

**महिषी**–(सनिर्वेदं) अद्य श्रुतं मया प्रणिधिमुखेन यन्निजं युवराजं कामयमाना पृथ्वीराजभगिन्यपि यवनसंसर्गदूषितान्वयप्रभवेति प्रत्यादिष्टा खलु वृथावलिप्तेन प्रतापेन। हा कीदृशोऽस्य यवनसंसृष्टकुलेष्वनादरः ।

**सार्वभौमः**–प्रिये, सर्वत्राभ्यसूयन्ति समुन्नतेभ्यो ज्ञातयः । तत्त्वया

समुन्नतं प्राप्य पदं महौजसा–
मुपेक्षणीयोऽल्पजनापवादः ।
किं चक्रवातेन पयोधरश्रिता
सौदामिनी स्वां लभते तिरस्क्रियाम् ।।९।।

अपिच महाभारतीययुद्धकालमारभ्याद्यावधि परमेश्वरेण समं सृष्टेषु मनुष्यजातेषु परावरबुद्धिभेदोत्पादकेन वर्णाभिमानेन कुलाभिमानेन च मुषिता भारतीयाः परस्परं विगृह्याविरतं स्वजनविध्वंसमेवापादयन्तीति नास्ति कस्याप्यविदितं नाम ।

**महिषी**–सुप्रसिद्धमेतत् ।

**सार्वभौमः**–एवं स्वजनेष्वसहिष्णुभिः राष्ट्रद्रुहैः प्रबलैः क्षत्रकुलैः परिमर्दिता भारतीयाः प्रजाः कालेन नामशेषतां भजेरन् इतिकृत्वा समादृतोऽस्माभिर्दिग्विजयक्रमः। विजितानां च क्षत्राधिपानां वृथाऽभिमानमुन्मूलयितुं प्रवर्तितोऽस्माभिर्नानाधर्माणां राजुकलानां मिथ उद्वाहः । एवं विगलितावलेपानां भारतीयवीराणां संघटनेन राष्ट्रं समृद्धं निरुपप्लवं च भविष्यतीति नास्त्यत्र सन्देहलेशस्याप्यवसरः ।

**महिषी**–तदेतन्नयप्रत्यवायभूतः प्रतापसिंहस्तु भारतीयानां सर्वथाऽहित–मेवाचरति।

---

**समुन्नतमिति –** *** उपजातिवृत्तम् । अर्थान्तरन्यासोऽलङ्कारः ।



**सार्वभौमः**–प्रिये सम्यगाकलितस्त्वयाऽस्मदुदारनयप्रचारः । अद्य त्वया–ऽनुमोदिता वयममितकोशबलव्ययेनापि तं वशीकर्तुं प्रतिजानीमहे ।

**महिषी**–अथ प्रसीदति ममान्तरात्मा । सर्वतः परास्ताः सन्तु साम्राज्यपरिपन्थिनः ।

**सार्वभौमः**–(तौर्यत्रिकध्वनिमाकर्ण्य) अहो जातः खलु संध्यास्तवनसमयः। साधयामस्तावत् ।

**महिषी**–अहमपि शिवाराधनायोपसर्पामि देवगृहम् ।

(इति निष्क्रान्ताः सर्वे)

।। समाप्तोऽयं **सार्वभौममानावखण्डन**नामा षष्ठोऽङ्कः ।।

---

**प्रतिजानीमह इति ।** अत्र विमर्शसन्ध्यारम्भः । तदुक्तं दर्पणे–'यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः । शापाद्यैः सान्तरायश्च स विमर्श इति स्मृतः ।।' इति । अत्र मुख्यफलोपायः सार्वभौमप्रतिज्ञया सान्तराय इत्यवधेयम् ।

**इति श्रीप्रतापविजयटीकायां सर्वाङ्गविद्योतन्यां**
**सार्वभौममानावखण्डननामा षष्ठोङ्कः समाप्तः ।**

## सप्तमोऽङ्कः ।

(ततः प्रविशति शैलशिखरावस्थितः मन्त्रिसहितः प्रतापसिंहः)

**प्रतापसिंहः**–मन्त्रिन् एवं तुरुष्केण विगृह्यमाणानामस्माकं व्यतीता–न्यायासबहुलानि पञ्चषाणि वर्षाणि । तथापि नायं साम्राज्यैश्वर्यमदर्पितो विरमत्युभयतः सैनिकानामविरतोपमर्दात् । तत्

संगृह्य साहसिकवीरभटान् महोग्रान्
व्यापादयामि तरसा किमरातिसंघान् ।
किं वा परं व्यसनमद्य रिपोः प्रतीक्षे
दोलायितं मम मनो न हि निश्चिनोति ।।१।।

**मन्त्री**–देव, नात्र साहसप्रतिपत्तिरुचिता । अचिरादस्मन्नयाऽभिभूतोऽयं स्वयमेव भग्नोद्यमो भविष्यति ।

(प्रविश्य)

**निषादपतिः**–विजयतां देवः । एष दिल्लीनगरतः संप्राप्तः पृथ्वीराजस्यानुचरो वृक्षवाटिकामधितिष्ठति ।

**प्रतापसिंहः**–शीघ्रं तं प्रदर्शय ।

**निषादपतिः**–तथा ।

(इति निष्क्रान्तः)

(ततः प्रविशति पृथ्वीराजानुचरेणानुगम्यमानो निषादपतिः)

**अनुचरः**–(दूरात् प्रतापसिंहं निर्वर्ण्य स्वगतम्) अहो नु खलु स्थान एवैनं

वातालोललतावितानविटपैरावीजयन्ति द्रुमा–
श्छत्रं वारिधराश्च बिभ्रति पुरो गायन्ति केकारवाः ।
नित्यं स्वादुफलानि चाच्छसलिलं संपादयन्त्यापगा
राज्यश्रीवियुतोऽप्ययं नृपवरो वन्यश्रिया नन्दितः ।।२।।

---

**संगृह्येति ।**– *** वसन्ततिलकावृत्तम् ।
**वातेति ।** *** शार्दूलविक्रीडितवृत्तम् ।



**निषादपतिः**–एष देवः । उपसर्पत्वेनं भद्रमुखः ।

**अनुचरः**–(उपसृत्य प्रणम्य च) विजयतां देवः । देवस्य स्वातन्त्र्यनिष्ठायां नितरां विश्रब्धेन मत्स्वामिनाऽनामयप्रश्नपूर्वकं प्रेषितमेतदनुयोगपत्रम् । तत्प्रति–वचनप्रदानेनानुगृह्णातु क्षत्रकुलेश्वरः ।

(इति पत्रमर्पयति)

**प्रतापसिंहः**–(उद्घाट्य वाचयति)

श्रीमन्मोगलेशसभामण्डपतः स्वातन्त्र्यैकरसं परमप्रेमास्पदं क्षत्रकुलनायकं महाप्रतापं प्रतापसिहं प्रणयाभिनन्दनपुरःसरं प्रणिपत्यावेदयति पृथ्वीराजः–यदचिरेण मेवाडपतिरस्मान् सार्वभौमपदेन व्यपदिश्यास्मच्छरणमन्विष्यतीति सपरिहासं सावलेपं च सार्वभौमेण यदा सामन्तमण्डलसमक्षमभियुक्तं तदा त्वत्पक्षपातिना मया तत्कालमेव

विषममुपगतोऽप्ययं यदि त्वां
सकृदधिराजमुदाहरेदजय्यः ।
सुरसरिदवशं वहेत्प्रतीपं
तपनकरोऽप्युदियात्तदा प्रतीच्याम् ।।३।।

इति सावष्टम्भं प्रत्याख्यातमस्यैतन्मिथ्याऽभिशंसनम् । तदविलम्बेनदिशतु मां क्षात्रधर्मावतारो यद्

अवितथवचनो वहामि गर्वं
किमु परसंसदि वीर गुम्फपाणिः ।

अथवा

अवनतवदनो ह्रियाऽपविद्धः
किमु वपुषि प्रहरामि मे कृपाणम् ।।४।।

इत्येषा त्वल्लोकोत्तरविक्रमानुरक्तस्य सुहृदो विज्ञप्तिः ।

**मन्त्री**–पृथ्वीराज धन्योऽसि ।

---

**अवितथेति ।** *** पुष्पिताग्रावृत्तम् ।

**प्रतापसिंहः–**(सविस्मयम्) अहो नु खलु परिपन्थिमध्यगतेनाऽप्यनेन सहसाऽऽविष्क्रियते मयि पक्षपातः । अयि क्षत्रवीर परमार्थत एव त्वमसि मम द्वितीयं हृदयम् । यतः

तपनान्वयसंभवस्य मे
स्फुटमेवाकलितो रसस्त्वया ।
मकरन्दगुणं मधुव्रतः
सुतरां वेत्ति न वन्यवारणः ।।५।।

**मन्त्री–**नूनं विरलाः सन्त्येतादृशाः परोक्षेऽपि प्रियंकराः सुहृदुत्तमाः ।

**प्रतापसिंहः–**अथ किम् । तल्लिख्यतां तावत्प्रतिवचनम् ।

**मन्त्री–**तथा ।

**प्रतापसिंहः–**(लेख्यमादिशति)

तुरुष्कसभायामपि निःशङ्कं सूर्यवंशयशःपरिपालनाय भीष्मप्रतिज्ञामारूढं प्रणयिनं सर्वात्मनाऽभिनन्द्य सप्रणयमावेदयति प्रतापो यत्

प्राणान्तेऽप्ययमेकलिङ्गशरणः क्षुद्रं तुरुष्काधिपं
सम्राजं किमुदाहरेत्तपनजः सुप्तः प्रमत्तोऽपि वा ।
गुम्फारूढकरो विडम्बय रिपूंस्त्वं सत्यसन्धोऽधमान्
प्राच्यां नित्यमुदेष्यति प्रमथनो ध्वान्तस्य देवो रविः ।।६।।

**मन्त्री–**देव लिखितं मया यथादिष्टम् ।

(इत्यर्पयति)

**प्रतापसिंहः–**(आदाय स्वनाममुद्राङ्कितं विधाय) भद्र, मत्प्रणयाभिनन्दनपुरःसरमर्पयैतदावेदनपत्रं मम हृदयंगमाय सुहृदे ।

**अनुचरः–**(सप्रश्रयमादाय) यदाज्ञापयति देवः ।

(इति निष्क्रान्तः)

**तपनेति ।** *** वियोगिनीवृत्तम् । अत्र दृष्टान्तपरिसंख्यालङ्कारौ ।
**प्राणेति ।** *** यावज्जीवं अखण्डव्रतो भविष्यति प्रतापसिंहः इति तात्पर्यम् ।



(प्रविश्य)

**निषादपतिः–**विजयतां देवः । परास्तास्ते परिपन्थिनः कूटप्रयोगपटुभिराटविकगणैः ।

उत्तुङ्गशृङ्गतरुगुल्मघटोपक्लृप्तै
राष्ट्रध्वजैरनुमिते तव संनिधाने ।
दूरादुपेय विजने चकिता भ्रमन्तो
दिक्संभ्रमा विनिहताः शतशो द्विषस्ते ।।७।।

तथापीदानीमुत्तरस्यां पूर्वस्यां च दिशि शैलोपरोधाय समाह्रियन्ते समेधितानि यवनदलानि । तत्समीपतरवर्तिनं शैलाग्रमारुह्य प्रत्यक्षीकरोतु महाराजः ।

**प्रतापसिंहः–**भद्र, आदेशय तावदारोहमार्गम् ।

**निषादपतिः–**इत इतो देवः ।

(सर्वे आरोहन्ति)

**प्रतापसिंहः–**(दूरमवलोक्य) अहो नाद्यापि दुरध्यवसायाद्विरमति तुरुष्काधिपः। भद्र, प्रतिक्षणमेधतेऽवरोधकदलम् । पश्य

आच्छाद्येवोष्णरश्मिं निजघनततिभिर्ध्वान्तमापादयद्भि-
र्हृन्मर्मोद्भेदिनादैः स्तनितपटहजैर्गर्वमाघोषयद्भिः ।
धारासंपातभग्नप्रतिभटविटपिव्याकुलोपत्यकान्तः
संक्रान्तो म्लेच्छसैन्यैर्जलधरनिवहैश्चाद्रिराजः पुरस्तात् ।।८।।

अपिच

तडिच्छतघ्नीस्फुरितप्रकाशिता
अरण्यकुञ्जेषु मतंगजद्विषः ।
नितान्तमालम्बिविलोलजिह्वा
गर्जन्ति कोपोद्धतकेसरा मुहुः ।।९।।

तन्न युक्तमत्र चिरमवस्थानम् ।

**आच्छाद्येति ।** *** स्रग्धरावृत्तम् ।
**तडिदिति ।** *** वंशस्थं वृत्तम् ।

**निषादपतिः**–अथ किम् ।

**प्रतापसिंहः**–तत्प्रतीचीनं शैलान्तरं संक्रमामहे । कुमारद्वितीयस्त्वं तावत् शैलाभ्यन्तरे प्रच्छन्नमवरोधमन्यत्र संक्रामय ।

**निषादपतिः**–तथा । (युवराजं प्रति) इत इतः कुमारः ।

(उभौ परिक्रामतः)

एते संप्राप्ता वयं शैलोपवनम् । (निर्दिश्य) तत्र राजोपकार्यायां सुरक्षितो निवसत्यवरोधजनः । तत्प्रविशतु कुमारः । अहं तावन्निभृतं स्थलान्तरमन्वेष्टुं पर्यटामि।

(इति निष्क्रान्तः)

**कुमारः**–(दूरं विलोक्य) का नु खल्वेषाऽस्वस्थशरीरा पर्यङ्कमधिशयाना सखीभिरुपचर्यते । (उपसृत्य) हा कष्टं निर्घृणेन मया दुरवस्थामापादितेयं सा राजकन्यका। (कर्णं दत्त्वा) अहो प्रियसख्या सा किमपि संलपन्तीव श्रूयते । यावद्वृक्षान्तरितो जानाम्यस्या मनोगतम् ।

(ततः प्रविशति यथानिर्दिष्टा राजपुत्री)

**सहचरी**–अयि, अविमृश्यकारिणामपरिहार्य ईदृशो दैवदुर्विपाकः । यतः

परानुवृत्ते प्रणयोन्मुखेऽपि या
मुग्धाङ्गनाविष्कुरुतेऽनुरागम् ।
समीरणानर्तितमेघवञ्चिता
सा चातकीवाशु शुचाऽवसीदति ।।१०।।

**राजपुत्री**–(निःश्वस्य) हला, अनभिज्ञासि खलु मदनविकाराणाम् । कुसुमसायकस्यैवेदमपराद्धं नाम यदनेनानुचितप्रार्थनाप्रवणानि क्रियन्ते मुग्धजनानां मनांसि।

स्वच्छन्दचारां मृदुकेलिनन्दितां
मुग्धां मनोभूः कुरुतेऽन्यसंश्रयाम् ।

---

**अविमृश्यकारिणामिति** । इत आरभ्य विप्रलम्भशृङ्गारो रसः ।
**परानुवृत्त इति** । *** उपजातिवृत्तम् । उपमालङ्कारः ।
**स्वच्छन्देति** । *** इन्द्रवंशावृत्तम् ।



विज्ञाततत्त्वा गुरवोऽपि मानिनो
निर्बन्धतो नैव चलन्ति निर्घृणाः ।।११।।

(इत्यश्रूणि मुञ्चति)

**युवराजः**–(निःश्वस्य स्वगतम्) हा तथ्यमेवाभिहितं कृशाङ्ग्या ।

**सहचरी**–सखि समाहिता भव ।

**राजपुत्री**–नूनमसमसायकस्यैवेदमपराद्धं नाम यदनेनानुचितप्रार्थनाप्रवणानि क्रियन्ते मुग्धजनानां मनांसि । (विचिन्त्य) अथवा नोचितस्तस्याप्युपालम्भः । स्माराभिरामेऽस्मिंस्तपनकुलललामे सानुरागं मनो विदधताऽनेन किमयुक्तमाचरितम्। अत्र त्वभिशंसनीयोऽस्ति केवलं मायावी मोगलेशो येनाभिजातान्यपि क्षत्रकुलानीदृशीं दुरवस्थामापादितानि । (पुनर्विचिन्त्य) अथवा हा ममैव मन्दभाग्यादहमवद्ये क्षत्रकुले प्रसूता येनानुरागवतोऽपि युवराजस्यापरिग्राह्या संवृत्ता ।

(इति निःश्वसिति)

**युवराजः**–(स्वगतम्) अहो अलोकसाधारणो मय्यनुराग आविष्क्रियते–ऽनयाऽऽत्माधिक्षेपेण ।

**सखी**–अयि किमेवं मिथ्याविकल्पनै रुजाक्रान्तमात्मानं संतापयसि । दैवाधीना हि प्राणिनां संयोगविप्रयोगाः । न कस्यचिद्भवन्ति सर्वेऽपि मनोऽनुकूला जगद्व्यतिकराः। तदसुलभप्रार्थनाप्रवणं मनः समाधाय क्षणं तावद्विनोदय वेदनोपद्रुतमात्मानम् ।

(इति वीणामर्पयति)

**राजपुत्री**–स्निग्धे, ईदृशीमवस्थामापन्नायाः कुतो मम विनोदः । तथापि शृणु मे चरमामभ्यर्थनाम् ।

(इति पर्यङ्क उपविश्य वीणामादाय साश्रु गायति)

**(सोहिनीरागेण त्रितालेन गीयते ।)**

अयि सखि मा कुरु मयि परिहासम् ।
सपदि तमानय नयनविलासम् ।। ध्रुवपदम् ।।
तन्मुखपङ्कजलोकनलोलम् ।
किमयि न पश्यसि लोचनदोलम् ।। अयि० ।। १।।

प्रत्यादेशपरुषमयि दयितम् ।
कामयते मुषितहृदयमयि तम् ।। अयि० ।।२।।
कथमपि कुरु सखि सत्वररचनम् ।
श्रावय चरमं तन्मृदुवचनम् ।। अयि० ।।३।।
द्रुतमुपयाहि प्रियतमसदनम् ।
निपतति मयि सखि निर्घृणनिधनम् ।। अयि० ।।४।।

(इति मूर्च्छति)

**सखी–**(वीणामादाय) सखि समाश्वसिहि समाश्वसिहि ।

(इति वीजयति)

**युवराजः–**(सोद्वेगं स्वगतम्) अहो बत महत्कष्टम् । एवमतिभूमिं गतोऽस्या अनुरागो मया कथं विनिवार्यः । संप्रति खलु ममैतद्

नृपसुताप्रणयेन वशीकृतं
गुरुजनैःप्रसभं विनिवारितम् ।
कुलयशःपरिपालननिष्ठुरं
व्रजति विक्लवतां स्तिमितं मनः ।।१२।।

तथापि सत्वरमुपसृत्य सान्त्वयाम्येनां प्रणयभङ्गविभिन्नहृदयां राजतनयाम् ।

**राजपुत्री–**(संज्ञां लब्ध्वा) हा प्रियतम क्व नु खलु विहरसि ।

**युवराजः–**(सहसोपसृत्य) एष सापराधस्ते जनस्त्वयाऽनुकम्पनीयः ।

**राजपुत्री–**(सहर्षं साश्रु) युवराजस्याकाण्डदर्शनेनाद्य खलु कृतार्थतां गमितेयं हतभागिनी ।

(इत्युत्थातुं प्रयतते)

**युवराजः–**कृशाङ्गि अलमलमायासेन । (हस्तेन मणिबन्धं स्पृष्ट्वा स्वगतम्) हा मन्दतां गतोऽस्या रक्ताभिष्यन्दः ।

(इत्यश्रूणि प्रमार्ष्टि)

**राजपुत्री–**(स्वगतम्) अहो मे सौभाग्यम् । प्रियतमकरतलस्पर्शेन

---

**नृपसुतेति ।** *** द्रुतविलम्बितं वृत्तम् ।



नूनमाप्यायितास्मि ।

**युवराजः–**अयि राजपुत्रि, अल्पीयसा कालेनैव प्रशममेष्यति तवोपतापः । नास्ति किमपि भिषजामसाध्यं नाम । तद्धैर्यमवष्टभ्य रक्ष तावन्निर्विण्णमात्मानम् ।

**राजपुत्री–**(दीर्घं निःश्वस्य) तपनकुलमणे मम पुनरन्यथा प्रत्ययः । तदेष ते चरमः प्रणामः । इदानीमेतदेवाभ्यर्थयते प्रणयभङ्गापहतहृदयैषा मन्दभागिनी यद्

यवनसंश्रयहीनकुलोद्भवा
त्वयि रता विजहाति कलेवरम् ।
हृदयनाथ तवास्तु समागमः
प्रणयबन्धजितो जयनान्तरे ।।१३।।

**युवराजः–**अयि सुन्दरि, कामापहृतमतिना युवराजेन कलङ्कितं लोकत्रयविश्रुतं रविकुलमिति माऽभून्मे दारुणः परीवाद इत्यनिच्छताऽपि मया प्रत्यादिष्टासि । तत्कृपया क्षमस्व मम नैष्ठुर्यातिरेकम् ।

अयि सुव्रते

शुचिवृत्तगुणौघसंपदा
शुचिवंशे स्थिरभावबन्धनात् ।
समुपार्जित एव शाश्वतः
पतिलोकस्य जयस्त्वयाऽनघे ।।१४।।

(प्रविश्य)

**कञ्चुकी–**विजयतां युवराजः । युवराजं द्रष्टुकामो निषादपतिरितो नातिदूरे वर्तते ।

**युवराजः–**राजपुत्रि रक्षतु त्वां रविकुलाधिष्ठातृदेव एकलिङ्गेश्वरः ।

**राजपुत्री–**पुनरप्यनुकम्पनीयेयं प्रणयिनी धर्मवीरेण ।

**युवराजः–**तथा ।

**कञ्चुकी–**इत इतो युवराजः ।

(उभौ परिक्रामतः)

---

**यवनेति ।** *** द्रुतविलम्बितं वृत्तम् ।
**शुचिवृत्तेति ।** *** वियोगिनीवृत्तम् ।

एष युवराजं परिपालयति निषादपतिः ।

(इति निष्क्रान्तः)

(प्रविश्य)

**निषादपतिः**–विजयतां युवराजः । निर्धारितो हि मयाऽन्यो निगूढः शैलाभ्यन्तरप्रदेशः । तदवलोकनार्थं तावत् प्रतिष्ठावहे ।

**युवराजः**–तथा ।

(इति निष्क्रान्तौ)

।। समाप्तोऽयं **मृषावादपरिहार**नामा सप्तमोऽङ्कः ।।

---

**इति श्रीप्रतापविजयटीकायां सर्वाङ्गविद्योतन्यां**
**मृषावादपरिहारनामा सप्तमोऽङ्कः समाप्तः ।**

## अष्टमोऽङ्कः ।

(ततः प्रविशति निगूढशैलाभ्यन्तरप्रदेशनिवेशितराजोपकार्यावस्थितो महिषीद्वितीयः प्रतापसिंहः)

**प्रतापसिंहः**–देवि, क्षमस्व मम व्रतनिर्बन्धम् ।

शुद्धान्तनर्मजनितश्रमखिन्नगात्री
याऽसेवतान्तिकगतां मृदुपुष्पशय्याम् ।
सा त्वं मयाऽभिनवपल्लवकोमलाङ्गी
संतापिताऽसि सुतनु व्रतनिष्ठुरेण ।।१।।

**महिषी**–आर्यपुत्र, कोऽयं व्यामोहः ।

त्वामेकवीरं पतिमात्मतुल्यं
प्रपद्य जाता सफला जनिर्मे ।
न बाधते मां विपिनाधिवासो
यथा परायत्तपरिग्रहत्वम् ।।२।।

अपिच

प्रासादे परिवारमण्डलयुतेऽरण्येऽथवा निर्जने
युद्धे प्रस्फुरितास्त्रपातविकटे लीलोत्सवे वा नवे ।
धत्ते मे समतां मतिः प्रिय यदा त्वत्पार्श्ववर्तिन्यहं
नेत्रस्यन्दिसुधाप्लुता च नितरां मन्ये प्रमोदं परम् ।।३।।

**प्रतापसिंहः**–(स्वगतम्) नूनं धन्योऽस्मि । (दूरं विलोक्य प्रकाशम्) देवि पश्यैष कुमारः क्रीडनकान्यादाय पुनरित एवोपधावति ।

(ततः प्रविशति यथानिर्दिष्टः कुमारः)

**कुमारः**–हता इमे मातङ्गाः केसरिकिशोरेण ।

(इति भग्नक्रीडनकानि दर्शयति)

---

**शुद्धान्तेति ।** *** वसन्ततिलकावृत्तम् ।
**त्वामिति ।** *** उपजातिवृत्तम् ।
**प्रासाद इति ।** *** शार्दूलविक्रीडितं वृत्तम् ।

**महिषी–**(सस्मितम्) केसरिणः किशोर इव त्वमपि हनिष्यसि रिपुमातङ्गान् ।

**कुमारः–**केऽस्मद्रिपवः ।

**महिषी–**ये खलूपद्रवकरास्ते सर्वेऽप्यस्मद्रिपवः क्षत्रिया वा यवना वा ।

**कुमारः–**कीदृशमुपद्रवं कुर्वन्ति ते ।

**महिषी–**तेऽस्मान् वशीकर्तुं प्रयतन्ते ।

**कुमारः–**(सरोषं स्वगतं) आः पापाः । (प्रकाशं) अपि तातः कथं तान् न हिनस्ति ।

**प्रतापसिंहः–**(सनिर्वेदं स्वगतम्) वत्सः खलु सत्यं ब्रवीति ।

**महिषी–**(सस्मितं प्रतापसिहं विलोक्य) तानुन्मूलयितुमेवोद्युङ्क्ते ।

**प्रतापसिंहः–**सद्यो विनंक्ष्यन्त्यस्मद्रिपवः ।

**कुमारः–**(परितो विलोक्य) अम्ब, किमत्रालेखितं दृश्यते ।

**महिषी–**एष कुंभलगडदुर्गप्रासादः ।

**कुमारः–**रमणीयः खल्वयम् । तत्रैव गन्तुमिच्छामि ।

**प्रतापसिंहः–**(सनिर्वेदं स्वगतम्) अद्यापि नूनं व्यथयति मेऽन्तरात्मानं तद्दुर्गापसारः।

**महिषी–**अचिरेण वयं तत्र यास्यामः ।

**कुमारः–**(साक्रोशम्) मा मैवम् । अतः परं न रोचते मे शैलाधिवासः । अद्यैव तत्र साधयामः ।

**महिषी–**वत्स मा रोदीः ।

(इत्याश्लिष्य चुम्बति)

**प्रतापसिंहः–**(सनिर्वेदम्) सूर्यवंशप्रभवैरपि किमेवमवलोकनीया म्लाना मुखच्छविः कुमारस्य ।

(प्रविश्य)

**धात्री–**एहि वत्स, अद्य त्वां दुर्गप्रासादं नयामि ।

(इति कुमारेण सह निष्क्रान्ता)

**प्रतापसिंहः–**(सनिर्वेदम्) अहो दुर्दैवविचेष्टितम् ।



आज्ञामन्वीक्षमाणाः क्षणमपि न पुरा मां विहातुं समर्थाः
प्राणानुत्सृज्य वीरा रिपुदलदलिताः शेरते ते पुरस्तात् ।
आकर्ण्यार्तं शिशूनां रुदितमविरतं राजभोगच्युतानां
मर्मच्छेदिप्रहाराहतमतिविभवः कं प्रतीकारमीहे ।।४।।

(सरोषम्) अथवाऽद्यैवावशिष्टै रणप्रवीरैः सह तरसाऽभिपत्य व्यापादयाम्यरातिनिवहान् ।

**महिषी–**प्रसीदत्वार्यपुत्रः । नात्र साहसप्रतिपत्तिरुचिता । तद्धैर्यमवलम्ब्य प्रतिपालयत्वार्यपुत्रोऽनुकूलमवसरम् । धैर्यमूला हि सर्वाः संपदः ।

(नेपथ्ये)

**वैतालिकौ–**विजयतां महाप्रतापो महाराजाधिराजः ।

श्रमापनोदार्थमिवास्तशैलं
समेत्य तत्संभृतनूत्नसारः ।
अनन्यसाधारणवीर्यदीप्तो
ज्वलत्ययं ध्वान्तहरः प्रतापः ।।५।।

**प्रतापसिंहः–**(आकर्ण्य) देवि, नूनं प्रतापस्य नयस्य चानुगुणमेव तव मन्त्रितम्। कः कोऽत्र भोः ।

(प्रविश्य)

**कञ्चुकी–**आज्ञापयतु देवः ।

**प्रतापसिंहः–**शैलारोहमार्गमादेशय ।

**कञ्चुकी–**इत इतो देव । एषोऽत्रोत्तुङ्गशिखरावस्थितो मन्त्रिवर्गः स्वामिनमेव प्रतिपालयति ।

(ततः प्रविशन्ति यथानिर्दिष्टा मन्त्रिणः)

**मन्त्रिणः–**(अभ्युत्थाय) स्वागतं देवस्य ।

**प्रतापसिंहः–**अप्युपलब्धा काचिदभिनवा प्रवृत्तिररातिसैन्यस्य ।

**प्रधानमन्त्री–**देव श्रुतं मया चारेभ्यो यत्संप्रति परावर्तनप्रवणानि वर्तन्ते

---

**श्रमेति ।** *** अत्रोत्प्रेक्षा समासोक्तिश्च । उपजातिवृत्तम् ।

प्रावृट्परिबाधितानि प्रत्यर्थिसैन्यानि ।

(प्रविश्य)

**निषादपतिः**–वर्धतां महाराजोऽभिमतार्थसिद्धिसौभाग्येन । अन्यत्र युद्धप्रवृत्तेन तुरुष्काधिपेन प्रत्याहृतानि परिक्षीणान्यवरोधकबलानि । प्रतिस्थानमवस्थापिताश्च स्थानिकाधिष्ठिताः कतिचन सैनिकाः स्वशासनप्रवर्तनाय । तच्छैलोच्छ्र्यात्तरसावतीर्य पुनरपि मेवाडमेदिनीमात्मसात्कर्तुमर्हति महाराजाधिराजः ।

**प्रतापसिंहः**–(सहर्षं) दिष्ट्याद्य खलु चरितार्थतां गतोऽस्माकं नयप्रचारः ।

**मन्त्री**–एकलिङ्गेशानुग्रहशालिनो देवस्य सर्वदाऽप्रतिहतैव साध्यसिद्धिः । यतः

अर्थार्थिनामभिमतार्थफलप्रसिद्ध्यै
निष्ठालवोऽप्यलमनुग्रहविग्रहेशे ।
येऽनन्तधाम्नि परमात्मनि लीनभावा-
स्तेषामभीष्टमधमैः प्रतिषिध्यते किम् ।।६।।

(प्रविश्य)

**वनेचरः**–(सविस्मयम्) आश्चर्यमाश्चर्यम् ।

यदृच्छोपगतो वन्यो वारणः शुण्डादण्डेन राष्ट्रध्वजोपरि संनिहितसरस उद्धृत्य विकिरति प्रफुल्लसरोरुहाणि ।

**निषादपतिः**–हन्त परं संनिहितं देवस्य विजयमङ्गलम् ।

**मन्त्री**–देव प्रत्यासन्नो हि युगपदभियोगानुकूलः शरदागमः । भविष्यन्ति तदानीं खलु–

संचारार्हास्तपनतपिताः कर्दमक्लिन्नमार्गा
अल्पाम्भोभिर्विपुलपुलिना निम्नगाः स्वच्छतोयाः ।
स्फारज्योत्स्नाविभवललिता दीर्घयामास्त्रियामा
नानावृक्षच्छदतृणमया शस्यपूर्णा धरित्री ।।७।।

---

**वर्धतां महाराज इति ।** अत्र निर्वहणसन्ध्यारम्भः । तदुक्तं दर्पणे– 'बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् । एकार्थमुपनीयन्ते यत्र निर्वहणं हि तत् ।।' इति ।

**यदृच्छोपगत इति ।** अत्र अद्भुतो रसः । तदुक्तं दर्पणे–'कुर्यान्निर्वहणेऽद्भुतम्' । इति ।



तत्सत्वरं बलोपचये एवाधीयतां यत्नः ।

**प्रतापसिंहः**–अथ किम् । कः कोऽत्र भोः ।

(प्रविश्य)

**रक्षपालः**–आज्ञापयतु देवः ।

**प्रतापसिंहः**–सेनापतिं द्रष्टुमिच्छामि ।

**रक्षपालः**–यदाज्ञापयति देवः ।

(इति निष्क्रान्तः)

(प्रविश्य)

**कञ्चुकी**–वर्धतां देवः पौत्रजन्ममहोत्सवेन ।

**प्रतापसिंहः**–(सप्रमोदं) महानेषोऽनुग्रहः एकलिङ्गेश्वरस्य ।

**सर्वे**–(सहर्षं) चिरं जीवतु अभिनवस्तपनान्वयाङ्कुरः ।

**प्रतापसिंहः**–भद्रमुख गृहाणेदं तव पारितोषिकम् ।

(इति मुक्ताहारमपर्यति)

**कञ्चुकी**–(सप्रश्रयमादाय) सहस्रांशुरिव शश्वत्तपतु तपनान्वयप्रतापः ।

(इति निष्क्रान्तः)

(प्रविश्य)

**सेनापतिः**–आज्ञापयतु देवः ।

**प्रतापसिंहः**–वीर, संनह्यन्तामस्मत्संनिहितानि पदातिदलानि ।

**सेनापतिः**–यदादिशति देवः ।

(इति निष्क्रान्तः)

(प्रविश्य)

**प्रतिहारः**–विजयतां देवः । अमात्यो द्वारि तिष्ठति ।

**प्रतापसिंहः**–शीघ्रं प्रवेशय ।

**प्रतिहारः**–तथा ।

(इति निष्क्रान्तः)

(प्रविश्य)

**अमात्यः**–वर्धतां देवो नयाभियोगसंपदा । चारेभ्यः शैलावरोधकगणानां व्यूहभङ्गं विज्ञाय प्रेषितं मया सादिदलं कुंभलगडदुर्गाक्रमणाय ।

**प्रतापसिंहः**–वीर परं प्रीणयति मां तव यथावसरं शीघ्रकारित्वम् ।

**अमात्य**–देव राजकार्येषु नास्ति समयच्युतिरिवान्यदनर्थकारणम् । एकलिंङ्गेशानुग्रहेण समुपनतोऽयमवसरो नास्माभिरुपेक्षणीयः ।

**मन्त्री**–सद्यस्तावत् समन्ततो युगपत्तुरुष्कानाक्रम्य पुनरपि स्वायत्तीकर्तव्यः समप्रदेशः ।

**प्रतापसिंहः**–प्रतिपद्येऽहं मन्त्रनिर्णयम् । अचलराजनिष्ठयोज्ज्वलितानां सामन्तमन्त्रिसचिवानां साहाय्येनैव साम्राज्यैश्वर्यमदोत्सिक्तस्य तुरुष्कस्य दर्पं शमयितुं प्रभवत्ययं प्रतापः ।

**मन्त्री**–देव स्वातन्त्र्यावतारं त्वादृशमीश्वरं प्राप्य धन्यतां यातेयं मेवाडमेदिनी।

**अमात्यः**–तथ्यमाह मन्त्रिप्रवरः । यतः

ईद्धः क्षात्रबलौजसा निजसुखे वीतस्पृहो योऽनिशं
धर्मस्थः परिपालयत्यभिनवस्नेहेन सर्वाः प्रजाः ।
लोकोपद्रवकारिणां प्रमथने जागर्ति यो दुष्कृतां
राज्ञस्तस्य विधीयते जनिशतैर्नैव क्वचिन्निष्कृतिः ।।८।।

**प्रतापसिंहः**–(शृङ्गस्वनमाकर्ण्य) अहो समाहृतानीव लक्ष्यन्ते पदातिदलानि।

(प्रविश्य)

**प्रतिहारः**–विजयतां देवः । पुरोवर्तिसमप्रदेशे व्यवस्थितान् पदातिनिवहान् प्रत्यक्षीकरोतु सपरिवारो देवः ।

**प्रतापसिंहः**–आदेशय तावदवरोहमार्गम् ।

**प्रतिहारः**–इत इतो देवः । (सर्वे परिक्रामन्ति) देव, एतेऽस्मत्सेनानिवहाः।

(इति निर्दिश्य निष्क्रान्तः)

(ततः प्रविशति गणाध्यक्षैः सह सेनापतिः)

**सेनापतिः**–स्वागतं देवस्य आर्यमिश्राणां च ।



**प्रतापसिंहः**–सद्यः प्रयाणाभिमुखा भवन्तु मम रणप्रवीराः ।

सुतीक्ष्णभल्लासिधनुर्भृतांवरा
विशालतूणीपरिणद्धपार्श्वाः ।
शौर्यातिरेकारुणितोग्रनेत्राः
प्रयान्तु मे नद्धपदातिसंघाः ।।९।।

**सेनापतिः**–यदादिशति देवः ।

(इति शृङ्गस्वनेन प्रयाणमादिश्य गणाध्यक्षैः सह निष्क्रान्तः)

**प्रतापसिंहः**–सामन्तप्रवराः नायं कालक्षेपावसरः । तद्

वेगेनाभिपतन्त्वरातिनिवहे व्यूढाः प्रवीरा भटा
आवस्कन्दतु चाश्ववाहकदलं दुर्गान् पराधिष्ठितान् ।
वृक्षच्छन्नवनेचरास्त्ववहिता रुन्धन्तु सीमाधिपान्
सद्यो रोपयितुं प्रतापमुदितः कालो द्विषामन्तकः ।।१०।।

तत् सत्वरं स्वसैन्यगणैः सह प्रतिदिशं प्रतिष्ठन्तां मम सामन्तवीराः ।

**सामन्ताः**–यदादिशति देवः ।

(इति निष्क्रान्ताः)

**प्रतापसिंहः**–मन्त्रिवर्य, निर्वृत्तस्तावत्प्रयाणप्रबन्धः । यावद्द्वयमपि स्वयमुदयपुरमाक्रमामहे ।

(इति निष्क्रान्ताः सर्वे)

।। समाप्तोऽयं **विजयप्रयाणो** नाम अष्टोमऽङ्कः ।।

---

**इति श्रीप्रतापविजयटीकायां सर्वाङ्गविद्योतन्यां**
**विजयप्रयाणनामा अष्टमोऽङ्कः समाप्तः ।**

## नवमोऽङ्कः ।

(ततः प्रविशतः सेनानायकौ)

**प्रथमः–**दिष्ट्या सुप्रभातमद्य स्वातन्त्र्यश्रिया समुल्लसितस्यैकलिङ्गेशाधिष्ठितस्य मेवाडजनपदस्य ।

**द्वितीयः–**अथ किम् । अहो वर्षाभ्यन्तरेणैव यवनयूथानि विद्राव्य शैलान्तः परिपालिताभिः प्रजाभिः पुनरप्यावासितेयं वीरजननी मेवाडमेदिनी मेवाडकेसरिणा महाप्रतापेन देवेन ।

**प्रथमः–**एवं पुनरपि स्वातन्त्र्यावतारेण देवेन समन्ततो विस्तारिता त्रिलोक्यां विश्रुता सूर्यवंशस्य यशःश्रीः ।

**द्वितीयः–**भद्र पश्यैतान् देवस्य विजयमहोत्सवमभिनन्दितुं समुत्सुकान् पौरजानपदान् । एतैरलङ्कृतेयं राजधानी परमां सुषमामावहति ।

ध्वजसरसिजमालामण्डिता राजमार्गा
मरकतमणिलेखारञ्जिताः कुट्टिमाश्च ।
नवविरचितरागालेख्यचित्रास्तराणि
दधति परमशोभां वासितान्यङ्गनानि ।।१।।

(इति परिक्रामतः)

**प्रथमः–**(परितो विलोक्य) अदृष्टपूर्वोऽयं खलु विजयमहोत्सवसमारम्भः । यतः

मुक्ताविद्रुमतोरणाञ्चितपुरोद्वाराणि तूर्यस्वनै–
श्चीत्कारैः करिणां मृदङ्गनिनदैरातन्वते मङ्गलम् ।
काञ्चीनूपुरकिङ्किणीक्वणितकै रम्यैर्यशौगीतिकां
गायन्ति प्रमदा महोत्सवमुदा मोदप्रफुल्लाननाः ।।२।।

---

**एवं पुनरपीति ।** उदयसिंहेन कलङ्किता सूर्यवंशकीर्तिः प्रतापसिंहेन पुनरपि विस्तारितेत्यनुसन्धेयम्।
**ध्वजेति ।** *** मालिनीवृत्तम् ।
**मुक्तेति** । *** शार्दूलविक्रीडितं वृत्तम् ।



**द्वितीयः–**(दूरं विलोक्य) एष सूर्यकुलाधिदैवतमेकलिङ्गेश्वरमाराध्य प्रत्यागतो देवः सभामण्डपमभ्युपैति ।

चण्डांशुप्रखरातपारुणरुचिर्दूरात्परांस्तापय–
न्नासीद्यस्तपनद्युतिः परिपतन् शृङ्गान्तरं शृङ्गतः ।
ज्योत्स्नासंमतमानदानपरमः पीयूषरत्नाकरः
सोऽयं चान्द्रमसीं दधाति सुषमामाह्लादयन्स्वाः प्रजाः ।।३।।

यावद्वयं सभामण्डपं प्रविश्यासनपरिग्रहं कुर्मः ।

(इति निष्कान्तौ)

### विष्कम्भकः ।

(ततः प्रविशति यथानिर्दिष्टः प्रतापसिंहः)

**सभ्याः–**(अभ्युत्थाय) विजयतां महाराजाधिराजः ।

(इति स्वर्णकुसुमानि विकिरन्ति)

**प्रतापसिंहः–**(छत्रचामरवरैरुपसेवितो रत्नसिंहासनमारुह्य) प्रियसामन्ताः दिष्ट्या एकलिङ्गेशानुग्रहेणानुभूयतेऽस्माभिरिदानीमयं मङ्गलावसरः ।

(ततः सामन्तमन्त्रिपौरजानपदमुख्या मणिमुक्तास्वर्णकुसुमस्रजः अर्पयन्ति)

(नेपथ्ये)

**वैतालिकौ–**विजयतां महाराजाधिराजः ।

अचलविपिनवासे नागराजोपजुष्टः
पुनरपि पतितन्त्रां प्रेयसीं राजलक्ष्मीम् ।
निषधपतिरिव त्वं भीमकन्यामवाप्य
प्रतिहतपरचक्रो राजसे राजसिंहः ।।४।।

(अष्टोत्तरशतशतघ्नीस्वनोपक्रमः)

---

**चण्डेति ।** *** अत्र निदर्शनालङ्कारः । शार्दूलविक्रीडितं वृत्तम् ।

**अचलेति ।** *** नागराजेन निषादपतिना पक्षे कर्कोटकेन उपजुष्टः सेवितः, निषधपतिः नलः भीमकन्यां दमयन्तीं इव पुनरपि पतितन्त्रां प्रेयसीं राजलक्ष्मीं *** । अत्र उपमालङ्कारः । मालिनीवृत्तम् ।

**वीणिनौ–**(वीणावाद्येन गायतः)

**(भैरवीरागेण त्रितालेन गीयते)**

महाव्रत भारतराजपते
मुदा तव जनता वन्दते ।। ।।ध्रुवपदम्।।
स्वातन्त्र्यसुधासकलसुधाकर-
रञ्जितराजमते । महाव्रत० ।।१।।
नयगुणविक्रमविदलितरिपुदल-
वञ्चितपरविजिते । महाव्रत० ।।२।।
पुरजनपदजनमनोऽनुरञ्जन-
सञ्चितलोकरते । महाव्रत० ।।३।।
दिव्ययशोध्वनिनन्दितसुरवर-
किन्नरगाननुते । महाव्रत० ।।४।।
जीव चिरं दिनकरकुलमण्डन
भारतधर्मपते । महाव्रत० ।।५।।

**प्रधानमन्त्री–**देवस्य प्रियवयस्यः पृथ्वीराजो दिल्लीनगरतः प्रेषयतीदं तुरुष्कमुद्राङ्कितं संधिपत्रम् ।

**प्रतापसिंहः–**तावदुद्घाट्य वाचय ।

**प्रधानमन्त्री–**तथा ।

(इति वाचयति)

श्रीमन्मोगलेशराजधानीतः स्वातन्त्र्यविक्रमोर्जितं सूर्यकुलावतंसं परमप्रेमभाजनममोघव्रतं महाराजं प्रतापसिंहं प्रणयाभिनन्दनपुरःसरं प्रणिपत्यावेदयति पृथ्वीराजः–यदुभयतोऽमितकोशबलक्षयं परिजिहीर्षुः सार्वभौमः



तुष्टस्तवाप्रतिहतामितविक्रमेण
सम्राट् स्वयं दिशति यन्नृपतिः प्रतापः ।
प्रौढप्रतापपरिवर्धितवंशकीर्तिः
कामं प्रशास्तु निरुपद्रवमात्मचक्रम् ।।५।।

इति ।

**प्रतापसिंहः–**दिष्ट्याद्य खलूद्धृतकणिका जाता मेवाडजननी ।

**प्रधानमन्त्री–**स्वातन्त्र्यावतारस्य देवस्यैष लोकोत्तरः प्रभावः ।

**प्रतापसिंहः–**यत्सत्यं प्रकृत्यनुरागायत्ता हि राष्ट्रसंपदः । तत्प्रियसामन्तवर्याणां पौरजानपदाटविकानां चाप्रतिमराजनिष्ठया प्रोत्साहितः तैरेव सानुरागं मेवाडराज्येऽभिषिक्तः प्रभवत्ययं प्रतापो मेवाडस्वातन्त्र्यं परिरक्षितुम् ।

**प्रधानमन्त्री–**दिष्ट्या महाप्रतापमीश्वरमुपाश्रित्याद्य कृतकृत्यतां प्राप्तेयं वीरजननी मेवाडभूः ।

**प्रतापसिंहः–**नूनमलोकसाधारणो हि मेवाडवीराणां राष्ट्रभक्तिविभवः । अतः

हुत्वा देहं निजं ये समरहुतवहे प्रस्थिताः पुण्यलोकां-
स्तेषां वीरोत्तमानां समुदितयशसामन्वये ये प्रसूताः ।
मत्युत्कर्षप्रतापप्रमथितरिपवो ये पुनर्नीतिदक्षाः
सर्वे ते राष्ट्रभक्ता नृपकुलविभवैर्माननीया यथार्हम् ।।६।।

**प्रधानमन्त्री–**तथा ।

(इति यथार्हं राजशासनानि वितरति)

**प्रतापसिंहः–**मन्त्रिन् सभाजय विदुषो विप्रवर्यान् कवीश्वरांश्च महार्हरत्नप्रदानेन नियतवार्षिकवृत्तिवितरणेन च । यतस्तदधीन एव राष्ट्रे सद्विद्याप्रचारो राष्ट्रयशोविभवश्च।

**प्रधानमन्त्री–**तथा ।

(इति यथार्हं महार्हरत्नानि राजशासनानि च वितरति)

**कवीश्वरः**–चिरं जीवतु स्वातन्त्र्यमूर्तिस्तपनान्वयमुक्तामणिर्महाप्रतापो महाराजाधिराजः । एष महाराजाधिराजमभिनन्द्याशास्ते विद्वज्जनो यत्

प्रबलकुटिलविद्विषां विभेत्ता
प्रतिदिनमेष तवैधतां प्रतापः ।
त्रिदिवविततकीर्तिरन्वयस्ते
प्रतपतु शश्वदमोघवीर्यदीप्तः ।।७।।

**प्रतापसिंहः**–(सप्रश्रयम् सस्मितम्) कविवर, प्रतिगृहीताशीः । अथ भूषणवसनान्नपानादिभिः सत्कृत्यानुरञ्जयतु मम पौरजानपदाटविकसंघान् सचिववर्गः।

**सचिवाः**–तथा ।

(इति निष्क्रान्ताः)

(प्रविश्य)

**प्रतिहारः**–विजयतां देवः । दिष्ट्याद्य देवस्य विजयमहोत्सवमभिनन्दितुं संप्राप्ता महर्षयः ।

**प्रतापसिंहः**–अविलम्बेन प्रवेशय ।

**प्रतिहारः**–तथा ।

(ततः प्रविशन्ति महर्षयः)

**प्रतापसिंहः**–(सर्वैः सहाभ्युत्थाय) भगवतो महानुभावानभिवादयत एष प्रतापः।

(इति प्रमप्रति)

**महर्षयः**–वत्स चिरं जीव । विष्णोरंशेनावतीर्णस्य तपनान्वयोद्वहस्य तव दर्शनार्थं वयमत्र समागताः ।

**प्रतापसिंहः**–महानेषोऽनुग्रहो भगवतां महानुभावानाम् ।

**महर्षयः**–वत्स, प्रसन्नाः स्मस्तव कुलाधिदेवनिष्ठया क्षात्रधर्मानुरागेण च । तत्किं ते भद्र करवाम ।

**प्रतापसिंहः**–भगवन्तः, एकलिङ्गेशानुग्रहेण संप्रति जातोऽस्म्यहं सकलश्रेयसां



भाजनम् । तथापीदमस्तु भरतवाक्यम् ।

आम्नायार्थप्रसितमतयो ब्राह्मणाः सिद्धमन्त्राः
संपद्यन्तां नरपतिगणाः क्षात्रतेजःसमिद्धाः ।
वैश्याः सर्वे नवनिधियुताः कारवः कारुदीप्ताः
स्वातन्त्र्यश्रीर्विलसतुतरां विश्वतो भारतेऽस्मिन् ।।८।।

।। समाप्तोऽयं **विजयमहोत्सवो** नाम नवमोऽङ्कः ।।

**।। समाप्तमिदं प्रतापविजयं नाम नाटकम् ।।**

---

**आम्नायेति ।** –आम्नायस्य वेदस्य अर्थे प्रतिपाद्ये विषये प्रसिता आसक्ता मतिः येषां ते सिद्धाः इष्टसाधनसमर्थाः मन्त्राः वेदमन्त्राः नयागमप्रतिपाद्याश्च येषां ते तादृशाः ब्राह्मणाः संपद्यन्ताम् । नरपतिगणाः राजानः क्षत्रस्येदं क्षात्रं च तत् तेजः तेन समिद्धाः दीप्ताः संपद्यन्ताम् । सर्वे वैश्याः नवभिः महापद्मादिभिः युताः युक्ताः संपद्यन्ताम् । कारवः शिल्पिनः कारुभिः विविधशिल्पैः दीप्ताः समृद्धाः संपद्यन्ताम् । अस्मिन् भारतवर्षे विश्वतः सर्वतः स्वातन्त्र्यश्रीः स्वातन्त्र्यलक्ष्मीः विलसतुतरां अतिशयेन विलसतु ।

**इति श्रीप्रतापविजयटीकायां सर्वाङ्गविद्योतन्यां**
**विजयमहोत्सवनामा नवमोऽङ्कः समाप्तः ।**

# पद्यसूची


अकारणद्वेषपरो ०..... – १.२८
अङ्गप्रकर्षरुचिराय ०..... – १.१३
अचलविपिनवासे ०..... – ९.४
अर्थार्थिनामभिमतार्थ ०..... – ८.६
अल्पः कदाचिन्महता ०..... – ४.१३
अवितथवचनो वहामि ०..... – ७.४
असत्यसन्धेषु जनेषु ०..... – २.२
अहो न्वियं पूर्णमृगाङ्क ०..... – ४.१९
आकृष्टभीषणकृपाण ०..... – ३.९
आच्छाद्येवोष्णरश्मि ०..... – ७.८
आज्ञामन्वीक्षमाणाः क्षण ०..... – ८.४
आ बाल्याद्यावनेशप्रगति ०..... – १.२६
आम्नायार्थप्रसितमतयो ०..... – ९.८
आसाद्य गूढनिलयं ०..... – ३.४
इद्धः क्षात्रबलौजसा ०..... – ८.८
उत्कृष्टे कुलदैवते ०..... – १.११
उत्तुङ्गशृङ्गतरुगुल्म ०..... – ७.७
उत्तुङ्गाद्रिविलासाः ०..... – ५.५
उत्साहाञ्चितबालकेलि ०..... – १.१
उदात्तगुणसंपदा ०..... – ६.६
उपनतनवयौवना ०..... – ४.१७
ऊर्जस्विनं शीलगुणा ०..... – ५.१
एकान्ततो मत्प्रणयाकुलां ०..... – ५.६
एते तालतमालराजि ०..... – ६.१
ऐश्वर्येणोल्लसन्तो ०..... – १.२३
कष्टं चिरायाचलवास ०..... – ४.१०
कादम्बरीपानविघूर्ण ०..... – ६.३
कुटिलनयगुणप्रतारि ०..... – ३.१
कुसुमितद्रुमराजि ०..... – ५.४
कृताभिषेकं गुणिनं ०..... – ३.७
क्षणेनायं व्योम्नि ग्लपय ०..... – २.३
गाढारक्तप्रकृतिर ०..... – ४.६
घनविरूढकलाञ्चि ०..... – ४.१५
चण्डांशुप्रखरातपारुण ०..... – ९.३
चण्डातपपरितप्तो ०..... – १.२
जनपदहितदक्षा ०..... – ४.९
जनैः ससत्वैः स्वकुल ०..... – ४.८
जाता न के नियतकर्म ०..... – २.१०
जातीरसाचम्पकपाट ०..... – ६.२
जितेन्द्रिया लोकहितै ०..... – १.१६
तडिच्छतघ्नीस्फुरित ०..... – ७.९
तपः प्रभावार्जितपुण्य ०..... – १.१९
तपनान्वयसंभवस्य मे ०..... – ७.५
तुष्टस्तवाप्रतिहता ०..... – ९.५
तुष्टस्तवोपासनया ०..... – ५.१४
तृणलतास्तरणां विमल ०..... – ५.३
तृणाय मत्वा सुतबन्धु ०..... – १.१७
तेजस्विनः क्षत्रगुणे ०..... – १.१०
त्रिभुवनविततोज्ज्वल ०..... – १.५
त्वामेकवीरं पतिमात्म ०..... – ८.२
दुर्गाद्रितुङ्गसरिदुत्प्लवने ०..... – २.९
दृढानुरागेण वशीकृतो ०..... – ५.७
ध्वजसरसिजमाला ०..... – ९.१
न मनाग् विकलव्रतो ०..... – ६.७
नवानुरागाञ्चितलोल ०..... – ४.१८
नानाप्रहारपटुवीर ०..... – ४.१२
नानामृगद्रुमविचित्रे ०..... – १.१४
नानारसैः स्वादुकलैः ०..... – ४.१४
नित्यं प्रियाननविलोकन ०..... – ५.१५
निमित्तमुद्भाव्य किम ०..... – १.८
नियमितविपथानु ०..... – १.९
निष्कारणं हतधियः ०..... – १.४
नृपसुताप्रणयेन ०..... – ७.१२
न्यायानुवर्तिनमुदार ०..... – २.१२
परानुवृत्ते प्रणयोन्मुखे ०..... – ७.१०
पार्ष्णिग्राहप्रकोपं प्रकृति ०..... – ४.५
प्रचण्डकोपानललोहिताक्षः ०..... – २.८
प्रत्युद्गतैः स्वैः कुशला ०..... – १.७
प्रत्युप्तस्फटिकाच्छकान्ति ०..... – १.१५
प्रथितकुलमहिम्ना ०..... – १.२०





प्रबलकुटिलविद्विषां ०..... – ९.७
प्रभञ्जनोत्पाटितवप्र ०..... – ४.२
प्राणान्तेऽप्ययमेकलिङ्ग ०..... – ७.६
प्राप्नोतु राष्ट्रं त्वचिरा ०..... – १.२१
प्रासादे परिवारमण्डल ०..... – ८.३
मदमतङ्गजगण्डविदारण ०..... – १.१८
महाजवैर्व्याधिगणैर ०..... – ३.५
महाप्रलयमारुत ०..... – २.११
मिथ्याप्रलापपरुषा ०..... – १.२५
मुकुलितां मधुसौरभ ०..... – ५.२
मुक्ताविद्रुमतोरणाञ्चि ०..... – ९.२
मृगः पुरस्तत्प्रतिरुद्ध ०..... – ३.३
यत्पूर्वजैरहिवमूर्ध्नि ०..... – ३.२
यत्र कुत्र गतं नाथ येन ०..... – ६.४
यथा वसन्ते नवपल्लवो ०..... – ५.११
यवननृपकुलाङ्ग ०..... – ४.१६
यवनसंश्रयहीन ०..... – ७.१३
राष्ट्रप्रतिष्ठापरिपालन ०..... – २.५
रिपुरुधिरपिपासाव्या ०..... – २.१
रिपून्मथनजृम्भिता ०..... – ४.७
लज्जां विहायाद्य कुलाङ्ग ०..... ५.१३
ललितसुमनोरागा ०..... – ५.९
लोकसंग्रहपरैर्जिता ०..... – २.१४
लोकानुरञ्जनपरस्य ०..... – १.१२
वातालोलललताविता ०..... – ७.२
विक्रीय देशकुलधर्म ०..... – १.२४
विगृह्य लोकाधिपति ०..... – ४.४
विना विवेकं प्रतिपद्य ०..... – ६.५
विषममुपगतोऽप्ययं ०..... – ६.८, ७.३
शुचिवृत्तगुणौघसंपदा ०..... – ७.१४
शुद्धान्तनर्मजनित ०..... – ८.१
शौर्यं च गुरुशुश्रूषा ०..... – ५.१२
श्रमापनोदार्थमिवास्तशैलं ०..... – ८.५
षाड्गुण्यप्रमुखप्रयोग ०..... – ५.१०
संरम्भस्फुरितारुणा ०..... – ३.१०
संगृह्य साहसिकवीर ०..... – ७.१
संचारार्हास्तपनत ०..... – ८.७
सपद्यहं विक्रमपक्ष ०..... – ५.८
समदनृपमभीक्ष्णं – ४.११
समुन्नतं प्राप्य पदं ०..... – ६.९
संमाननानाविधदान ०..... – ३.६
सहस्रकिरणद्युतिर्ज्वलन ०..... – १.३
सामन्तमन्त्रिजनता ०..... – ४.१
सामोपचारैर्नृपतिं ०..... – ४.३
साम्ना विधाय नृपतीन् ०..... – १.६
सुतीक्ष्णभल्लासिधनु ०..... – ८.९
स्मृत्वा पूर्वाननुपदकृतान् ०..... – २.४
स्वच्छन्दचारां मृदुकेलि ०..... – ७.११
स्वरक्षणार्थं रचिता ०..... – २.७
स्वल्पोपकारच्छलतो ०..... – १.२७
स्ववीर्यविश्रम्भहतारि ०..... – २.१३
स्वातन्त्र्यनिष्ठासुसमिद्ध ०..... – २.६
स्वातन्त्र्येऽपहृते त्रिविष्टे ०..... – १.२२
हीनप्रभावोऽपि निगूढमन्त्रो ०..... – ३.८
हत्वा देहं निजं ये समर ०..... – ९.६

## पद्यानां छन्दःसूची

अनुष्टुप् – ५/१२, ६/४

उपजाति – १/७, १/८, १/१०, १/१६, १/१७, १/१९, १/२१, १/२७, १/२८, २/२, २/५, २/६, २/७, २/८, २/१३, ३/२, ३/३, ३/५, ३/६, ३/७, ३/८, ४/२, ४/३, ४/४, ४/८, ४/१०, ४/१३, ४/१४, ४/१८, ४/१९, ५/१, ५/६, ५/७, ५/८, ५/११, ५/१३, ५/१४, ६/२, ६/३, ६/५, ६/९, ७/९, ७/१०, ७/११, ८/२, ८/५, ८/९,

औपच्छन्दसिक – ६/७, ६/८,

गीति – १/२, ५/५

द्रुतविलम्बित – १/१८, ४/१५, ५/२, ५/३, ५/४, ७/१२, ७/१३

पुष्पिताग्रा – १/५, १/९, ३/१, ४/१६, ४/१७, ७/३, ७/४, ९/७

पृथ्वी – १/३, २/११, ४/७, ६/६

मन्दाक्रान्ता – २/४, ४/६, ८/७, ९/८

मालिनी – १/२०, २/१, ४/९, ४/११, ९/१, ९/४

रथोद्धता – २/१४

वसन्ततिलका – १/४, १/६, १/१२, १/१३, १/१४, १/२४, १/२५, २/९, २/१०, २/१२, ३/४, ३/९, ४/१, ४/१२, ५/१५, ७/१, ७/७, ८/१, ८/६, ९/५

वियोगिनी – ७/५, ७/१४

शार्दूलविक्रीडित – १/१, १/११, १/१५, १/२२, ३/१०, ५/१०, ६/१, ७/२, ७/६, ८/३, ८/८, ९/२, ९/३

शिखरिणी – २/३

स्रग्धरा – १/२३, १/२६, ४/५, ७/८, ८/४, ९/६

हरिणी – ५/९

## गीतानां तालिका

| क्रम | स्थान | ध्रुवपदम् | राग | ताल |
|---|---|---|---|---|
| १. | प्रस्तावना १/२ पश्चात् | सुखयति मधुररसा सरसी ।। | भीमपलास | त्रिताल |
| २. | १/८ पश्चात् | सुन्दरवनमाली मदयति हृदयमालि ।। | भूपकल्याण | मठ |
| ३. | २/७ पश्चात् | भट्टा नदताट्टमेव – हर हर हर महादेव । | भूपाली | दादरा |
| ४. | ३/३ पश्चात् | इह सखि विहरति ललितविहारः । सुमनोमोहननन्दकुमारः । | जयवती | त्रिताल |
| ५. | ६/४ पश्चात् | ललितनवकदम्बमाल–विलसिततनुगोपबाल–<br>लीलापतिरेष कोऽपि वादयते वेणुम् ।। | कर्णाट | अठ (ध्रुपद) |
| ६. | ७/१२ पूर्वम् | अयि सखि मा कुरु मयि परिहासम् ।<br>सपदि तमानय नयनविलासम् ।। | सोहिनी | त्रिताल |
| ७. | ९/४ पश्चात् | महाव्रत भारतराजपते । मुदा तव जनता वन्दते । | भैरवी | त्रिताल |

# गीतानां स्वरसंयोगः ।

### १. राग–भीमपलास ताल–त्रिताल. (पृ० १९४)

***स्थायी**

२ ० ३ x
म प ग म । प नि ध प । ग रे नि सा । म – – – ।।
सु ख य ति । म धु र र । सा ऽ स र । सी ऽ ऽ ऽ ।।

**अंतरा**

२ ० ३ x
प – प प । धप मप ग म । प नि प नि । सां – सां – ।
सा ऽ र स । हं ऽ स वि । हं ऽ ग म । मि थु नं ऽ ।

२ ० ३ x
सां – – – । प नि सां – । नि नि ध प । म प ग म ।
ऽ ऽ ऽ ऽ । ऽ ऽ ऽऽ । वि ह र ति । मृ दु र ह ।

---

*** तदुक्तं संगीतरत्नाकरे–**

उद्ग्राहः प्रथमो भागस्ततो मेलापकः स्मृतः ।
ध्रुवत्वाच्च ध्रुवः पश्चादाभोगस्त्वन्तिमो मतः ।।
ध्रुवाभोगान्तरे जातो धातुरन्योन्तराभिधः ।। इति ।।
अत्रोद्ग्राहो नाम स्थायिस्वरविशिष्टः स्वरसमूहो लोके
स्थायीति प्रसिद्धः ।

**लक्ष्यसंगीते भीमपलासलक्षणम्–**

काफीमेलसुसंजाता मता भीमपलासिका ।
आरोहे रिधहीनं स्यादवरोहे समग्रकम् ।।



२
प – गम गरेसा ।।
सि ऽ ऽ ऽ ।।

### २. राग–भूपकल्याण (*भूपाली) ताल–मठ (सुलफाग) (पृ० १९७)

**स्थायी**

x २ २ ३ ०
प ध । सां ध । प ग । रे ग । – ग ।
म द । य ति । हृ द । य मा । ऽ लि ।

x ० २ ३ ०
ग ग । प ग । ध प । ग – । रे सा ।
सुं ऽ । द र । व न । मा ऽ । ली ऽ ।

**अंतरा**

x ० २ ३ ०
ग ग । प प । ध प । ध सां । – सां ।
प्र मु । दि त । न य । न सा । ऽ र ।

x ० २ ३ ०
ध सां । रें – । ध सां । ध प । – प ।
प्र ण । यि म । नो ऽ । वि हा । ऽ र ।

---

मध्यमांशग्रहन्यासा मुक्तमध्यममंडिता ।
अपराण्हे समीचीनं गानमस्याः सुनिश्चित्तम् ।।
मध्यमस्यैव वादित्वाद्धनाश्रीर्नैव संभवेत् ।
प्रतिलोमे यतः पूर्णा धानी शंका कुतो भवेत् ।।

| **वादीस्वरः** | **संवादी स्वरः** |
|---|---|
| **म** | **सा** |

**आरोहावरोह**

**सा ग म प नि सां नि ध प म ग रे सा ।**

* एतल्लक्षणमन्यत्रोक्तम् ।

x ० २ ३ ०
गं रें । गं रें । सां सां । रें सां । ध प ।
वि लु । लि त । कु सु । म हा । ऽ र ।

x ० २ ३ ०
ध – । पध – । ध प । ग – । रे सा ।।
शा ऽ । ली ऽ । व न । मा ऽ । ली ऽ ।।

## २. अथवा राग–हमीर ताल–मठ (सुलफाग) (पृ० १९७)

### स्थायी

x ० २ ३ ०
ध नि । सां रे । सां नि । ध प । – प ।
म द । य ति । हृ द । य मा । ऽ लि ।

x ० २ ३ ०
ध – । म॑ प । म॑ प । ग म । ध – ।।
सुं ऽ । द र । व न । मा ऽ । ली ऽ ।।

---

**लक्ष्मसंगीते हंमीरलक्षणीम्–**

कल्याणीनामके मेले हंमीरः प्रोच्यते बुधैः ।
गग्रहः पांशकः कैश्चिद्धैवतांशोऽपि लक्ष्यते ।।
धैवतेऽवधारणं यन्नैतद्वादित्वकारणम् ।
लक्ष्यगतं समालोच्य बुधः कुर्यात्स्वनिर्णयम् ।।
स्यादारोहे निदौर्बल्यमवरोहेऽपि गस्य तत् ।
सायं गेयं तथा पूर्णं वक्रं रूपं सतां मतम् ।।
मध्यमावत्र द्वौ ग्राह्यौ रोहण एव तीव्रमः ।
सरलत्वे रोहणस्य यमनः स्यात्सुनिश्चितम् ।।

**वादी–प, ध संवादी–सा, रे**

**आरोहावरोह**

**सा रे ग म ध नि सां नि ध प म॑ प ग म रे सा ।**



x ० २ ३ ०
प प । प – । प ध । प सां । – सां ।
प्र मु । दि त । न य । न सा । ऽ र ।

x ० २ ३ ०
ध नि । सां रें । नि सां । नि ध । – प ।
प्र ण । यि म । नो ऽ । वि हा । ऽ र ।

x ० २ ३ ०
गं मं । गं रें । नि सां । रें सां । – सां ।
वि लु । लि त । कु सु । म हा । ऽ र ।

x ० २ ३ ०
ध – । प – । म॑ प । ग म । ध – ।।
शा ऽ । ली ऽ । व न । मा ऽ । ली ऽ ।।

## ३. राग–भूपाली, ताल–दादरा. (पृ. २०८)

### स्थायी

x ० x ०
ध – सां – । ध प । ग ग प । ग रे सा ।
भ ऽ ट्टा । ऽ न द । ता ऽ ट्ट । मे ऽ व ।

---

**लक्ष्यसंगीते भूपालीलक्षणम्**

कल्याणीमेलसंजाता भूपाली बुधसंमता ।
आरोहे चावरोहेऽपि मनिहीना भवेत्सदा ।।
गांधारः केवलं वादी धैवतोऽमात्य ईरितः ।
संगतिर्गपयोः प्रायस्तत्र रक्तिं समावहेत् ।।

**वादी–ग संवादी–ध**

**आरोहावरोह**

**सा रे ग प ध सां ध प ग रे सा ।**

x ° x °
ग रे ग । रे प प । ग ग रे । सा – सा ।।
ह र ह । र ह र । म हा ऽ । दे ऽ व ।।

**अंतरा**

x ° x °
ग ग ग । प प प । प ध प । सां – सां ।
धा ऽ व । त रि पु । क ट क । पा ऽ र ।

x ° x °
ध सां ध । सां रें रें । सां रें सां । ध – प ।
म ध म । कृ त म । हा ऽ प । चा ऽ र ।

x ° x °
गं – गं । गं रें रें । सां रें सां । ध – प ।
रु ऽ ष्टा । ऽ न द । ता ऽ ट्ट । मे ऽ व ।

x ° x °
ग रे ग । रे प प । ग ग रे । सा – सा ।।
ह र ह । र ह र । म हा ऽ । दे ऽ व ।।

**४. राग–जयावंती, ताल–त्रिताल (पृ० २१८)**

**स्थायी**

२ ° ३ x
रे ग म प । रे ग रे सा । रे सा नि सा । रे – नि सा ।
इ ह स खि । वि ह र ति । ल लि त वि । हा ऽ रः ऽ ।

---

**लक्ष्यसंगीते जयावंतीलक्षणम्–**

कांभोजीमेलके जाता जयावंती सुखप्रदा ।
ऋषभांशा सुसंपूर्णा सोरट्यंगेन मंडिता ।।
तीव्रगस्य प्रयोगोऽत्र सोरटीमपसारयेत् ।
अवरोहे रिसंलग्नं कोमलं गं बुधः स्पृशेत् ।।
मंद्रस्थस्य पंचमस्य रिस्वरेण सुसंगतिः ।
छायानट्टस्वरूपस्य क्वचित्संदेहकारिणी ।।

**वादी–रे** **संवादी–प**

**आरोहावरोह**

**सा रे ग म प नि सां नि ध प म रे ग रे सा ।**



२ ° ३ x
ग म प – । म – रेगरे – । सा – ध नि । रे – नि सा ।।
सु म नो ऽ । मो ऽ हे न । नं ऽ द कु । मा ऽ रः ऽ ।।

**अंतरा**

२ ° ३ x
म प नि नि । सां – सां सां । रें गं रें सां । नि – ध प ।
मु हु र नु । प त ति स । वि ग लि त । ल ऽ ज्जः ऽ ।

२ ° ३ x
म प ध – । म – रेगरे – । सा नि ध प । रे – नि सा ।।
त व मु ख । पं ऽ क ज । म लि रि च । स ऽ ज्जः ऽ ।।

**५. राग–नायकीकानडा, ताल चौताल. (पृ० २४४)**

**स्थायी**

x ° २ ° ३ ४
नि सा । रे – । प ग । म – । रे – । सा – ।
ल लि । त न । व क । दं ऽ । ब मा । ऽ ल ।

---

**लक्ष्यसंगीते नायकीकानडालक्षणम्–**

काफीमेलसमुत्पन्नो नायकीकानडो मतः ।
षाडवो धैवतत्यक्तो लक्ष्याध्वनि समीक्षितः ।।
पूर्वांगे स्यात्सुहायोगः सारंगस्योत्तरांगके ।
मध्यमो निश्चितो वादी षड्जोऽमात्यनिभः स्वयम् ।।

**वादी–रे** **संवादी–सा**

**आरोहावरोह**

**सा रे ग म प नि सां नि प म ग रे सा ।**

नि सा । रे सा । सा सा । नि – । नि – । – प ।
वि ल । सित । त नु । गो ऽ । प बा । ऽ ल ।

सा – । रे – । रे प । ग – । म रे । – सा ।
ली ऽ । ला ऽ । प ति । रे ऽ । ष को । ऽ पि ।

नि प । म प । ग – । म – । रे – । सा – ।।
वा ऽ । द य । ते ऽ । वे ऽ । ऽ ऽ ।णुं ऽ ।।

**अंतरा**

म म । म प । प प । म प । नि सां । – सां ।
मृ ग । म दां । ऽ क । ति ल । क भा । ऽ ल ।

गं – । मं – । रें सां । नि सां । रें सां । नि प ।
मं ऽ । जु ऽ । स्व न । र चि । त जा । ऽ ल ।

रें – । सां – । सां सां । नि नि । प नि । नि प ।
ली ऽ । ला ऽ । ग ति । रे ऽ । ष को । ऽ पि ।

सां – । नि प । म प ।ग म । रे – । सा – ।।
वा ऽ । द य । ते ऽ । वे ऽ । ऽ ऽ । णुं ऽ ।।

**६. राग–सोहिनी, ताल–त्रिताल (पृ० २५५)**

**स्थायी**

---

**लक्ष्यसंगीते सोहनीलक्षणम्–**

मारवामेलसंजाता सोहनी लक्ष्यसंमता ।
आरोहे चावरोहेऽपि परिक्ता कीर्त्यते सदा ।।



सां सां नि ध । म म ग ग । ग म ध नि । सां – सां – ।
अ यि स खि । मा ऽ कु रु । म यि प रि । हा ऽ सं ऽ ।

सां सां नि ध । म म ग ग । ग म ध नि । सां – सां – ।।
स प दि त । मा ऽ न य । न य न वि । ला ऽ सं ऽ ।।

**अंतरा**

ग – म ध । नि सां – सां । सां – सां – । सां रें सां – ।
त ऽ न्मु ख । पं ऽ क ज । लो ऽ क न । लो ऽ लं ऽ ।

सां – गं मं । गं – रें सां । सां –नि ध । धनिनि धनिनिं
कि म यि न । प ऽ श्य सि । लो ऽ च न । दो ऽ
धनि ध ।।
ऽ लं ।

**७. राग–भैरवी, ताल–त्रिताल, (पृ.० २६८)**

**स्थायी**

सा । निसागम प ध प । ग – ध प । गम गम ग रे । सा – –

म । हा ऽ व्र त । भा ऽ र त । रा ऽ ज प । ते ऽ ऽ

---

उत्तरांगप्रधानत्वे वादित्वं धैवते भवेत् ।
अमात्यसंनिभो गः स्याद्रायनं शेषयामके ।।

**वादी–ध** **संवादी–ग, रे**

**आरोहावरोह**

**सा ग म ध नि सां रें सां नि ध म ग रे सा ।**

ध । प - ध नि । ध प गम पध । प धप ग - । रे सा -
मु । दा ऽ त व । ज न ता ऽ । ऽ ऽ वं ऽ । द ते ऽ

**अंतरा**

प । - ध - नि । नि सां - - । धनिसां धनिसां रें सां - ।
स्वा । ऽ तं ऽ त्र्य । सु धा ऽ ऽ । ऽ ऽ ऽ ऽ

सां रें सां सां । ध नि ध प । पधनि - ध प ।
स क ल सु । धा ऽ क र । रं ऽ जि त

गम गम ग रे । सा - -
रा ऽ ज प । ते ऽ ऽ

संयोजक :- **दत्तात्रेय का. वेलणकर**

---

**लक्ष्यसंगीते बैरवीलक्षणम्**

लक्ष्ये भैरविमेलो यो ग्रंथानां तोडिसंज्ञकः ।
अस्मान्मेलात्समुत्पन्ना भैरवीलोकविश्रुता ।।
आरोहेऽप्यवरोहे सा संपूर्णेव सदा मता ।
उत्तरांगप्रधानत्वे प्रातःकालोचिता भवेत् ।।
केचिदत्र वर्णयन्ति समौ संवादिनौ स्वरौ ।
धगावन्ये जगुः केचिद्बुधः कुर्याद्यथोचितम् ।।

**वादी–प, सा, रे, ध** **संवादी–सा, म, प, ग**

**आरोहावरोह**

**सा रे ग म प ध नि सां नि ध प म ग रे सा ।**